CC-0. In Public Domain. Digitization by Agam Nigam Prabandh Tattva Heritage Foundation, Kolkata and IKS-MoE

151

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata and IKS-MOE

151

151

133. b. # ओं शिवज्ञानबोधव्याख्या ॥

— ※ —

गणेशं गुहमीशानमम्बिकां भारतीं गुरून् ।
नत्वा वृत्तिं शिवज्ञानबोधे लेशात्करोम्यहम् ॥

तत्र तावदेतत् ग्रन्थकर्ता कोऽयमिति जिज्ञासायां तावदे-
तानि शिवादीनि व्यक्तिमूर्तिभूतानि सन्ति यद्यपि-
त्रिपदार्थज्ञानात्मकस्यास्य सिद्धकथार्थक्रियाभूतत्रिपदा-
र्थविषयत्वेऽपि शिवप्रधानत्वाच्छिवविषयं शिवज्ञानं
शिक्षायोगाद्बोधेन बोधयन्ति व्याख्यान्तीति शिवज्ञान
बोधाख्यानि रौरवप्रोक्तानि द्वादश सूत्राणीति
द्राविडदेशीय लोकबाहुल्येन तत्रत्यैः शैवाचार्यैरस्य-
ग्रन्थकर्ता रौरवकर्तृत्वाच्छिव इति विवक्षितः । पुनः
पूर्वपक्षस्तथा तानि कथितानि [illegible] शम्भुना ।
तत्सर्वमधरीकृत्य शिवसिद्धान्त ईरितः ॥
सिद्धान्त एव सिद्धान्तः पूर्वपक्षास्ततः परे ।
मितार्थादमितार्थस्य व्याख्यानमिति सूरयः ॥
इति कामिक रत्नत्रय मृगेन्द्र श्रुतेः पूर्वपक्षकोटिस्थस्य-
मितार्थ वेदान्तात् सिद्धान्तस्योत्तरपक्षत्वादमितार्थ-
त्वाच्च वेदशिवागमयोः सामान्य विशेषशास्त्रत्वेऽपि
शब्दशास्त्रीय सूत्रवत् बाध्य बाधकतया द्विविधेन

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

क्वचित्प्रकारविशेषेऽपि बहुशो ऐकार्थ्यात् पुनरुक्तो-
-र्ध्वस्रोतस्समुज्ज्वलत् साक्षादीशानमुख पञ्चक प्रसूत-
-सिद्धान्तत्वेन चतुर्मुख ब्रह्मादिविषयक तत्पुरुषादि-
सद्योजातान्ताधस्स्रोतस्समुज्ज्वलच्चतुर्मुख प्रसूत-
-वेदान्तादुत्कृष्टत्वाच्च वेदान्त सार संहितानां हालास्य-
माहात्म्यादि प्रसिद्धोर्ध्वस्रोतः प्रसूतोत्कृष्ट वेदविहि-
-तौत्तिक कामिकादि शिवागम शिरोवर्तिनां ज्ञान-
पादानां वेदान्त शिरोभूतानां ज्ञानकाण्डानां वेदान्ता-
-ख्यत्वमिव एकान्त प्रमुख प्रसिद्धागमान्ताख्यत्व-
-मस्तीत्यागमान्ताख्ये नन्दिनाथाय गणाय शिवेन
प्रोक्त ज्ञानागमानां सामान्य चतुष्पाद्रहस्य विद्यमाने
ज्ञानपादे यथा कथंचित् पादान्तरेष्वपि सम्भूत सारार्थ-
संक्षेप निक्षेप सङ्ग्रह स्वाहं देशिवज्ञान बोधाख्येन
श्रीमता केनचिदाचार्येण कृतानि द्वादशसूत्राणि अत-
शिवज्ञान बोधाख्यानीति कर्णाटक देशीय लोकवाद-
-त्वेन त्वेन तत्रत्यैश्शैवाचार्यैस्सम्बन्धकर्ता शिव-
इत्युक्तिःकाल्पनिकीति शिवज्ञान बोधाख्यः कश्चिदा-
134. a. -चार्य इति विवक्षितः। सतु को वा भवतु स कर्ता।
तावतापि पति पशु पाश त्रि पदार्थाभिधेयाभिधायक-
भाव सम्बन्धापि तत्त्रिपदार्थविषय विषयि भाव -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सम्बन्धि व्याप्ति ज्ञानकार्य व्याप्य-व्यापक सूत्र कारण।
कार्य कारण कार्यकारण भाव सम्बन्धानि त्रिपदार्थ-
विषयाणि तज्ज्ञान निर्वर्त्य दीक्षा योगाद्युपदेश द्वारा
कैश्चित्कथंचिज्जीवन्मुक्ति साक्षात्कार पूर्वं कैश्चित्तत्पूर्वं
सर्वथा सर्वथा साक्षात्कारकार परापर मोक्ष फलानि
दीक्षितेन तत्कामिनाधिकारिणा पठितव्यानि
द्वादशावन्त सूत्राणि सुरचितवान्। तत्र तावल्लक्षण-
प्रमाणाभ्यां वस्तुसिद्धिरिति श्रुतिः। तथापि
तत्रापि शुष्कतर्क निर्मुक्तानवद्यस्य प्रसिद्धानि
प्रमाणानि कथंचित्सलक्षणं वस्तुमात्रं ज्ञापयन्ति।
तत्प्रमाण स्फुरितानि लक्षणानि तथा स्व ख्यातिभूतं
स्वलक्ष्यं वस्तु स्वालक्ष्य वस्त्वन्तरेभ्यो व्यावृत्तं
कृत्वा स्वविशिष्टं पुनस्तत्प्रमाण विशेष विषयं
कुर्वन्ति। ततोऽस्ति कर्तृत्वनुविद्ध पूर्वार्धेन कर्तेति
यौक्तिक यौगिक संज्ञत्वात् सर्वज्ञस्य सर्वकर्तृत्वाद्यनुमित
सर्वज्ञत्वाविनाभूतेन लक्षयति सत्सिद्ध परीक्षकेण
सर्वकर्तृत्व रूपेण लोकप्रसिद्ध सोद्देश लक्षणेन
लक्षितस्य शिवप्रमाण शिवागम शिवयोग-
प्रत्यक्ष क्रमिक सिद्ध परीक्षा परीक्षकस्य पशुप्रमा-
-णातीतस्य पति पदार्थाश्रयस्य कर्तुः सत्तास्ति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न वेत्ययोगि यादि प्रतिवादि विप्रतिपत्ते स्तथास्ति
न वेति भावव्युत्पत्तिकमननारब्ध विचारात्मक-
परीक्षा द्विकोटि मध्या दस्ती त्येककोटि स्थापनकरण-
व्युत्पत्तिक विचारारब्ध लिङ्ग लिङ्गव्यवहित शिवशक्ति-
व्यक्तिचिह्नितिलक्षण शिवशास्त्र दृष्ट शिवप्रमाणानु-
मान पाठकं पुनरपरार्धेन सपाति पदार्थः कर्तापि
स्वदृक्कृतः प्रोक्तैः पशुपाशात्मेश्वर स्वतंत्रतः ।
सद्भावेन बद्धस्य स्वभावेश्वर नमोऽस्तु तस्मैत ; इति
व्योम व्यापि श्रुतेः । मायादर्पण ब्रह्मबिंब प्रतिबिम्बा-
सत्भूतासत्भावेश्वर विवर्त वेदान्तीश्वर विलक्षण-
तया मनस्संयोगज ज्ञानेश्वर बुद्धि संयोगज ज्ञाने-
श्वरभूत वैश्याधिकेश्वर पातञ्जलेश्वराद्धीश्वर विल-
क्षणतया । स्वाभाविक वृद्धि ये द्धा विशालाक्षा सद्भा-
वेश्वर रूपतया सिद्ध सद्भावेन शुद्ध नित्य सत्यभूतेन
पञ्चकृत्य कृत्वा त्मना पुनस्सर्वज्ञतादि षाड्गुण्य-
3H. 6. गर्भार्थ प्रत्यर्थान्तररूप सविकल्प निर्विकल्पज्ञान
कार्ययोग्यता सापेक्ष स्वनिष्ठक्रियार्थ क्रिया सर्वज्ञ
कर्तृत्वरूपानन्त स्वरूपलक्षणभूत शिवत्वात्मका प्र-
कृति प्रकृतेरविकृति विकृत्यात्मना समुन्मिषता-
सृष्टत्वादि संहर्तृत्वान्ता विकृति विकृते रप्रकृति -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रकृत्यात्मना निर्विकल्पार्थ बोधेऽपि क्षेत्रात्मा प्रत्यय-
स्थित इति श्रुतेः। शाब्द सविकल्पत्व मात्र विधुर-
प्रत्यर्थान्तरत्व सविकल्प शाब्दान्तरनुन्मिषदुन्मिषत्-
क्रिया कार्य मात्र निर्विकल्पज्ञान मात्रो ग्रासीनात्मलब्ध-
कृत्स्नावान्तरन्निमिषत् सूक्ष्म पञ्चकृत्य ब्रह्मेश्वरः
परशिव इति च पुनस्सविस्तरं वक्ष्यमाण निर्विकल्प
सविकल्प उभयोल्लेखिनी दृगात्म परस्व विषय नियति
नियमन शाक्त सविकल्प बुद्धि याम बोध गर्भविजृम्भ-
संरंभात्म भोगकृत् सदाशिव इति च। पुनस्त्व-
बहिस्स्वान्तःस्थल्य भोग निर्विकल्प सविकल्पोभयोल्लेखि-
नी ज्ञात्म परस्व विषय संकोचि सङ्कल्पात्माधिकारकृदी-
श्वर इति च त्रिधैकधावृतेश्वरत्वेन बहिस्स्वरूप-
लक्षणेन लक्षित शिव इति पतिलक्षणपावकं प्रथम-
सूत्रं पठति। स्त्रीपुन्नपुंसकादित्वाज्जगतः कर्ता
कार्यदर्शनात्। अस्ति कर्ता सहत्वैतत् सृजत्यस्मा-
त्प्रभुर्हरः। ननु गौतम मतादिके.

प्रत्यक्षमेकं चार्वाकः कणाद सुगतौ पुनः ।
अनुमानं च तच्चाथ सांख्याः शाब्दं च ते अपि ॥
न्यायैकदेशिनोऽप्येवमुपमानं च केचन ।
अर्थापत्त्युपमाने च तानि चाह प्रभाकरः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अभाव षष्ठान्येतानि भाट्टवेदान्तिनस्तथा ।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः ॥
प्रत्यक्षमनुमानं च सहशाब्देन शङ्करे ।
इति प्रमाण निर्बन्धने शैवे प्रमाणत्रय निर्बन्धनात् ॥
पुनः । अक्षादि करणैर्दृष्टं प्रत्यक्षन्तद्धि गीयते ।
लिङ्गलिङ्ग्यादि विज्ञानमनुमानमिति स्मृतम् ॥
आप्तोक्ति वचनैर्गम्यं शाब्दमेतदुदाहृतम् ।
रागमादि प्रमाणैस्तु दुर्लक्ष्यं तच्छिवं स्मृतम् ॥
अप्रमेयमनन्तत्वा द्निर्देश्य मलक्ष्यतः ।
अदृष्टं चेद्सत्भावो दृश्यञ्चेज्जडिमा भवेत् ॥
सम्भोस्तद्व्यतिरेकेण रूपं ज्ञेयं विदुर्बुधाः ।
अनाख्येयस्य तत्वस्य निर्गुणस्य यशस्विनि ॥
गुणवत्ग्रहणं कृत्वा कथये त्परमेश्वरम् ।
बुद्धि बोध प्रकाश्यत्वं शिवस्यान्वेससमीहितम् ॥
शैवमानमविज्ञेभिः पञ्चमानानुभासितैः ।
आत्मापविषयो यस्या भोक्ता भोग्यमतः कथम् ॥
स्वप्रकाशमसौ देवं प्रकाशयति शङ्करम् ।
अन्तःकरण वृत्तिर्या बोधाख्या सा महेश्वरम् ॥
135. a. न प्रकाशयितुं शक्ता पाशत्वाज्जडत्वादिवत् ।
इत्यादि श्रुतेः । प्रमाण लक्षणातीतत्वात् प्रमाणै -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लक्षणेन वा तैर्विना केनाप्यप्रमेयो निर्विशेषो निर्गुणश्शिवः। प्रामाणिकस्स लक्षणोन्यथा भूत्वा वा कथं गम्यते। प्रामाणिकस्य सलक्षणस्य च प्रमेयत्वात् लक्ष्यत्वाच्च। अप्रामाणिकस्य लक्षण-हीनस्य वस्तुत्वात् यथाकथंचित्प्रमाण गम्योऽपि न तावत्प्रत्यक्ष गम्यः। बहिरिन्द्रियवाक्चक्षुराद्य-न्तरिन्द्रिय मनोबुद्धि प्रमुखातीतत्वात्। नानुमानागम-गम्योऽपि व्याप्ति संकेत ग्रहणयोः प्रत्यक्षमूलत्वात्। सत्यम्। पशुदृक्षुकः प्राप्तैः पशुपाशात्मेश्वरस्व-तन्त्रैः। सत्भावेन यद्युक्तस्सद्भावेश्वर नमोस्तु तस्मैत इति श्रुतेर्वाक्सहकृत चक्षुरादि बहिरिन्द्रिय प्रत्यक्ष-मनोबुद्धि प्रमुखान्तरिन्द्रिय प्रत्यक्ष पाशयोग प्रत्यक्ष-पशुयोग प्रत्यक्ष बौद्ध परामर्शमात्रानुमान पशुशास्त्र-रूपागमारब्धैः पुनः पति पशुपाश त्रिपदार्थ माहात्म्य-पाश पशुपदार्थ मात्र विषयाद्याः परमत कृत भाव-व्युत्पत्तिकाया शिवमत कृत करण व्युत्पत्तिकाया: निर्विकल्प शुद्धाशुद्ध कलादि तत्ववृत्ति सूक्ष्मादि वाग्वृत्ति क्रमिकोल्लिखितायाः परिमितायाः कथंचित् क्वचित्परपति विषया परिमितायाश्शुद्धाशुद्ध सविकल्प बुद्धि वृत्त्यात्मिकायाः पाशज्ञानारब्धायाः प्रमायाः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

साधकतमैः पुनस्तया प्रमया तदनुरूपमभिव्यङ्ग्या-
-या भावव्युत्पत्तिमात्रया; करणव्युत्पत्तिकज्ञानरूप-
-पशुचिद्व्यापारार्थक्रियाभूतायाः पुनश्चिदपरपति
ज्ञानान्तरितायाः पशुज्ञानात्मिकायाः प्रमायाश्च
करणैः पुनः करणव्युत्पत्तिकैः पशुज्ञानात्मकैः
पुनस्तथाकृतव्युत्पत्तिकपरपतिज्ञानात्मपरपति
प्रमाणोपबृंहितैः पुनः पशुप्रणीतपशुशास्त्रपठितै-
-स्तैः पशुदृष्टैस्तैः पशुप्रमाणैस्संसिद्धः; प्रमाणैः प्राक्
प्रोक्तशिवत्वेश्वरत्वप्रकाशिकान्तर्बहिः स्वरूपलक्षणाभ्या-
-मङ्कितः पतिप्रमाणानन्यप्रमेयतया तत्प्रोक्तलक्षण-
-प्रमातृत्वमात्रेण स्फुरन् प्रमेय इति शब्दलिङ्गादि-
-निरपेक्षत्वात् स्वतः सापेक्षत्वतस्साक्षादप्यसाक्षादपि
पतिशक्तिव्यङ्ग्यत्वतः परमार्थतस्स्वतोऽपि पतिपति
प्रमाणात्मकचित्प्रत्यक्षचित्त्वानुमानचिदागमचिद्-
-चिद्भूतकृपरोक्षवेदनपरोक्षवेदनस्फुरणैकस्फुरितः
प्रमेयश्शिवो न प्रमेयः किन्तु पशुपाशात्मतटस्थ
लक्षणेन तत्पशुप्रमाणैरसमर्थैश्शैव विषयप्रति-
-प्रमाणप्रदेशैश्च तथा तटस्थलक्षणेन प्रमेयः।
135. b. तथापि तत्र च लक्षणया शब्दैस्समर्थैश्शैव प्रबोधितैः
तदसमर्थैश्शैवैरपि तथा तत्स्फुरणस्फुरितः प्रमेयः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ततः प्रमाणातीत इत्युक्तम् । मलमात्रमलकर्म्ममायो-
पाध्युपहिताणवा कर्तृत्वरूपपाशत्वलिङ्गगुणात्म-
मलकर्म्ममायोपाध्युपहित किञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्व-
रूप सकलत्वलिङ्गगुणात्माणुः शिवशास्त्रपठित-
पशुलक्षणेन च तदन्तरित साञ्जनसकलापर-
पतिलक्षणेन च मलवासनामात्रोपबृंहित महामाया
मायोभयकलोपाध्युपहित मन्त्रमन्त्रेश्वरमन्त्रमहेश्व-
राणुसदाशिवाणुसद्योजाताद्यपरपतित्वलिङ्गगुणात्म-
पतिशास्त्रमात्रपठितापरपतिलक्षणेन च तदुभय-
तटस्थलक्षणनिर्मुक्तनिरुपाधिकस्वरूपलक्षणान्तः-
पातनीयत्वात्तटस्थलक्षणस्वरूपलक्षणोभयमध्यस्थं
स्वान्तर्हित दृक्क्रियात्मचिन्मात्रात्मत्वलिङ्गगुणात्मकं
कथंचिद्बुधैः पशुशास्त्रपठितं सर्वोपरि पतिशास्त्र-
पठितमात्मलक्षणमित्यपि तत्त्वोपाध्यातानाति-
क्रान्तबिन्दुकपरत्वपूर्वातिक्रान्तबिन्दुक सर्वग-
त्वादिरूपपरत्वलिङ्गगुणात्मकं पतिशास्त्रमात्र-
पठितं परलक्षणमित्युभयात्मलक्षणपरलक्षण।
मात्रेण च प्रोक्तशिवप्रमाणे स्वरूपतः शिवो न
हि शेयः। पुनर्महामायामायोत्पन्नतत्त्वतात्त्वि-
कात्मना च पुनर्यथाहं मनोवाक्कायसमवेतक्रिया-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

हेतो शुद्धाशुद्धबोद्धृ सत्त्वरजस्समुद्ध तच्छुद्धाशुद्धबुद्धि-
समन्विता पुरुषस्य संस्कारनाम शुद्धाशुद्धकर्मात्म-
तत्कर्मोपादान भावात्म तद्भावोपादान प्रत्ययात्म-
तत्प्रत्ययोपादान सुख मात्रात्म सुख दुःख मोहा-
त्म सर्वविषया सर्वविषयाध्यवसाय स्मृति-
प्रतिभार्थ क्रियाकर्तृ बुद्धि गुणात्मना च पुनस्तन्मू-
ल प्रकाशप्रवृत्ति नियमार्थ क्रियाक शुद्धाशुद्ध-
नादनाद प्रकृति समुत्थ सत्त्व रजस्तमो गुणात्मना
च पुनस्तदुद्गीर्ण प्रथमविकृति प्रामिकवृत्त-
चतुरश्र त्र्यश्र ऋजुकुटिल ह्रस्व दीर्घ स्थूल सूक्ष्म नील
पीतादि रूपादि गुणात्मना च पुनस्तत्तद्गुणपुञ्ज
परिणाम वैचित्र्य काठिन्य कोमलत्व रूपादितया-
वयवात्मना च तत्स्वरूपात्म कर्मात्मना च पाश-
न क्लिष्ट गुण पशुशास्त्र पठित पाश लक्षणेन च
शिवः प्राक्प्रोक्त स्वरूप लक्षणस्सन् साक्षादितर-
व्यावृत्तः प्रोक्त शिव प्रमाणैर्वेदितव्यः। किन्तु
पशुपाशसंस्पर्शित इति पुनः।

स्याद्वै ध्यानतो देवं जपेत्तद्वाचकं जपम् ।
क्षित्यादीनि यथा तत्त्वानि तद्रूपाणि कृतानि वै ॥
योगी वै व्यापकं स्याद्वै मनीषी दीपरूपिणम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

136. a. अप्रबुद्धशिवस्याधो ह्युत्पत्तौ तु सदाशिवम् ।
निर्मलादर्शनप्रख्यश्शुद्धस्फटिकसप्रभः ।
बिन्दुरूपशिवो ह्येयो नाम्ना मातु सदाशिव इति
दा श्रुतेश्चतुर्मुखब्रह्मप्रमुख पञ्चवक्त्रत्रिपञ्च-
दृगुपरिमूर्त्युपबृंहित सदाशिवाख्यमूर्तितत्त्वमूर्ति-
रपि लिङ्गत्रिकालार्कचन्द्रामृतसागराभभूत बिन्द्वा-
काशरूपादिको भूत्वा यथार्हपरपत्न्यात्मपशुपाश-
मेतटस्थलक्षणस्सपुनरस्यावृत्तोपि लक्षणया
कथञ्चिद्बुद्धवृत्तौ ज्ञेय इति दुर्लक्ष्यो लक्षणातीत इत्य-
भ्युक्तम् । ततस्तथापि शिवागमपरिभाषा विवक्षया
महामाया मलमायाकर्म तद्धर्म कार्य शिवतत्त्वादि
शुद्धविद्यातत्त्वान्त पञ्चतत्त्व कलातत्त्वादि पृथिवी
तत्त्वान्तानां त्रिंशत्तत्त्व तात्त्विकानामचिद्वस्तूनां
शिवात्मशक्तीनां च चिद्वस्तूनां यथार्हं समवायः
कीदृगीदृगित्युच्यते । तावत् श्रुतिमतां सर्वैक-
देशेन सा पूर्वरूपत्वादिनिवृत्तौ रूपान्तरत्वा-
दिभावस्थानं विकारः । सर्वदा सर्वथा यथास्थि-
तिमच्छ्रुतिमतान्वयात्वेन द्वैधैकधावस्थानन्न
विकार इति युक्तेः । बिन्द्वाख्योपि ये भावा-
स्समान परिणामिनः । ज्ञानमेव स्थिर नित्य-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-जडवर्गस्य दीपकम् ॥ अभिव्यञ्जक हेतूनां
सत्त्वैव प्रवर्तित:। क्षणिकत्वात्तु नित्याया
अपि सद्योनुभूयते ॥ धारावाहिक धीश्चापि क्षणिके
वानुभूयते। इति शिवागमश्रुतेश्च जडचिद्विवक्षि-
तं विकृति निर्विकृति यथा तथा तदेव तदात्मना
वर्तनं समवाय इति समवाय निर्वचन संक्षेपः ।
तद्विस्तरं च समुद्ध्रियते। शिवमते स्वरूपलक्षण
-लक्ष्यमात्र रूपाणि कानिचिद्वस्तून्यापेक्षा धारव-
-कृत गौण मुख्यत्व विधुरत्वात् परमार्थतो गुण-
-गुणित्वाभावेपि विश्लेष पुञ्ज विवक्षितानि गुण-
गुणित्वोपचरितानि तत्र तथोपचरित गुण पुञ्ज-
-मेव परिणाम वैचित्र्यात् काठिन्य कोमलात्मक-
-तया गुण पुञ्जावयवात्मकं तदवयव पुञ्जाव-
-यव्यात्मकं च भूत्वा वयवि द्रव्य संज्ञितम् गुणि-
-द्रव्य संज्ञितं च तत्र विश्लेष विवक्षयावयवसंज्ञं
गुणसंज्ञं च भवति। सादृश्यमेव नित्यानित्य वस्त्वा-
-त्मकव्यक्तेरव्यतिरिक्तत्वान्नित्यानित्य वस्त्वात्मव्यक्ते-
-रव्यतिरिक्त स्वरूपात्मकं सन्नित्यात्मकमनित्यात्म-
कं च भूत्वा स्थितमिति नित्यात्मिका पुनरनित्या-
-त्मिका च जातिरुच्यते। पुनस्तत्रानित्यात्मकमपि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam, Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सादृश्यं कुर्वत्तकत्व हेतुसिद्धा नित्यवस्तुनाशो-
-त्पत्त्युपत्याद्यपात्रभूतयोरुभयात्मको व्यक्त्यात्मनोः
कारणकार्ययोरपृथक्स्थितेः क्रमिकं सता कार्येण
तथा सता कारणेन च सह पृथक्स्थातुम् सत्ताम-
स्वात्मना साक्षात्कं च सद्रूपक्रियात्मकार्यात्म स्वात्मनः
कादाचित्कक्रियात्मकारणात्म स्वात्मनितरात्म-
स्थितिलक्षणानुबन्धतया अनन्यं सदपि नित्यात्मक-
मनित्यात्मकं च भूत्वा स्थितमिति नित्यात्मिका
पुनरनित्यात्मिका च जातिरुच्यते । न हि तार्कि-
-काणामिव व्यक्तिव्यतिरिक्ता सर्वगता व्यक्तिसर्वगता
वा नित्या तथापि क्वचिदनित्यवस्तुन्यनिष्टं प्राथमिका
सत्यपृथक्सिद्धा क्वचिन्नित्यवस्तुनि शाश्वत्युत्पत्ति
समनन्तरं व्यक्त्यापत्त्या पृथक्सिद्धा व्यक्तिनाशे पृथक्-
-सिद्धा वा क्रियापि चिद्रूपक्रियात्मिका सती स्थिर-
-रूपिणीति जड़रूपक्रियात्मिका सती शक्त्यात्म
व्यक्त्यात्म सत्कार्य कारणात्म सत्कारणकार्यात्म-
-साक्षात्कक्रियावत्त्वात्मनि व्यक्त्यात्म स्थितिकाले-
-पि कदाचित्तिरोभूय कदाचित् तिरोभूय कदाचित्
प्रादुर्भूय च तदात्मना समावर्तते । ततस्तद्वदवस्थं हि
वस्त्वेवं पूर्वं क्षीरं ततो दधि । पश्चाच्चक्रान्तथा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-मायाविचित्रपरिणामतः। इति श्रुतेस्सत्कार्य-
कारणात्मशक्त्यात्मना सत्कारणकार्यात्म व्यक्तयात्मना
चैकस्यैव वस्तुनस्साद्धास्तिक ताद्रूप्य तादात्म्येन
वर्तनं समवायिकारणकार्ययोस्समवायः। कथं-
-चित् क्वचित्तथा विवक्षितान्यपि सर्वथा नैरवा-
-विकादि विवक्षिताधाराधेय गुणगुणित्व लक्षण-
लक्षितत्वरहितत्वात् कान्यपि कानिचिद्वस्तूनि-
-न्यनिर्वचनीयान्यपि चितेश्चित् सहजो धर्म्म इति
श्रुतेस्सर्वदा सर्वथा वास्तवैकात्म सहज धर्म्म धर्म्मी-
भूत स्वरूप लक्षण लक्षितत्वानिर्वचनीयानी यानी-
-ति स्वतो बहिर्मुखानां नीलादीनां ज्ञानादीनां च
स्वान्तर्मुख बहिर्मुख स्वरूपक्रमिक विवक्षया
विवक्षितेन जडचिद्विवक्षितसविकारनिर्विकार-
बहिर्मुख स्वरूप मात्र विवक्षितानां स्वतःसिद्ध-
संहतिमतःकृत विश्लेष क्रमिकविवक्षया वा
विवक्षितेन गुणात्मना च ताद्रूप्यतादात्म्येन
वर्तनं समवायः। तथा विवक्षितेनावयव्यात्मना-
-वयवात्मना च ताद्रूप्यतादात्म्येन वर्तनं च समवायः।
प्रागनुपदमेव प्रोक्तयेतिमात्रेणैव विवक्षित विश्लेष-
जातिव्यक्त्यात्मना तथा तादात्म्येन वर्तनं समवायः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तथा विवक्षित विश्लेषमात्र क्रिया क्रियावदात्मना
तथा तादात्म्येन वर्तनं च समवायः। विशेषणदा-
र्थस्य सार्वत्रिक स्वीकृतत्वाभावात्। तथा त्वेपि
प्रोक्तरीत्या व्याख्यात्मकत्वात् तथा वर्णनमिति
न पृथग्वर्णनम्। तदेतद्धि व सिद्धान्त सिद्धसम-
वाय सम्बन्धोपि तदेकस्यैव वस्तुन स्वात्मस्वा-
त्मान्तर्भावस्वरूपात्म साद्दाहितक स्थित्यात्म
व्यापार इति स समवायो नैयायिकाद्यभ्युपगत
समवायवद्भावमानं द्रव्यं क्षणमगुणन्तिष्ठतीति
क्षणं चिरं वा स्थित्वा कयोश्चिन्मध्ये कस्यचि-
द्द्येतया पुनरभावमानं चिद्चिदात्म द्रव्यादिकं
सादास्तिकयोः कयोश्चिन्मध्ये क्वचिद्दिग्भागेप्य-
परमाण्वादिके कस्यचित् ज्ञान रूपादिकस्योदय-
तथा सादास्तिक कादाचित्कयोः कयोश्चिन्मध्ये
137.a क्वचिदात्म पार्थिव परमाण्वादिके कस्यचित् ज्ञान-
~~137.a~~ रूपादेस्य कदाचिद्युततयापि सदापि क्षणं च तिष्ठत
सगुणमगुणं न तिष्ठतीत्याधारधेयतया युतसिद्धयो-
रुभयोः पदार्थयोस्सम्बन्धो हि सम्बन्धिभ्यां
भिन्नस्तदुभयाश्रितोप्येकस्त्वद् पदार्थेष्वन्यतमो
व्यक्तिव्यतिरिक्तः पदार्थान्तरस्सन्नहि पृथक्पदार्थो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-विशेषण विशेष्य भावादेरिव सम्बन्धस्य पृथक्स्वरू-
-पत्वात् । संयोगोपि परस्पर स्पर्शात्मना द्विधा भूता
सम्बन्धिनो ऽव्यतिरिक्तत्वेन स्थितत्वात्ते विभागात्म-
-नापि तत्र वर्त्तत इति सामास्तिक स्सम्बन्धस्य पृथक्
स्वरूपात्मक इति च पृथक्पदार्थः । ततः पारमा-
-र्थिक स्वरूप पर्यालोचने शिवशक्त्याख्य द्विधैकधा-
-वृत्त चैतन्ये तथावृत्तात्म चैतन्ये तथा वृत्त दीपशक्त्या-
-दिके च शिवशक्तिरात्माशक्तिर्दीपशक्तिरित्यादि-
-कान्तर्मुख बहिर्मुख स्वरूप विशिष्टैक देश विव-
क्षामात्रे कृते अवयवावयविभ्यां तदुभयात्मक विशेषचित्स्व-
-रूप तदुभय विशेष स्वरूप व्यष्टिभ्यां वा बहिर्मुख-
स्वरूपमात्र विवक्षया विचित्रत्र पक्षिणि नील पीत-
-श्याम रक्त शुक्ल वर्णात्म चतुरश्रवृत्त ह्रस्व दीर्घत्वोचि-
-तावयवस्थित संस्थानात्म द्विरूप शब्द स्पर्श रस गन्ध-
गुणास्तत्तद्गुण पुञ्ज पक्ष तुण्ड चूडा ग्रीवा शिरः पाद पुच्छा-
-वयवाश्च समग्रं सन्तीत्यादि समुदाय विवक्षामात्रे कृते-
-ऽवयव समष्टिभ्यां विचित्रत्र पक्षिणि विरूपकं रूपं गुणं
वास्तीति विशिष्टैकदेश विवक्षामात्रे कृते व्यष्टिसम-
-ष्टिभ्यां तदन्तर्मुख बहिर्मुख स्वरूपयोरस्तयोः कृत -
व्यष्टिभ्यां वा संहतात्योन्या नाहितातिशय सहकरण-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मात्रोपकार्योपकारकान्योऽन्य सहकारि सापेक्ष स्वभा-
व स्वरूप सामर्थ्य मात्र निर्वर्तनीय भाव व्युत्पत्तिक ज्ञान-
गम नास्ति विचित्र स्वरूपार्थ क्रिया कलां कर्तृकरण-
व्युत्पत्तिक ज्ञानादीनां नीलादीनां चो- पचरिते गुण-
गुणित्वे परीक्षिते सिद्धेन निरुपचरिते सिद्धे भगवता
रामकण्ठ निरुपम गुरुणापि ज्ञानादिकं नीलादिकं च
किमपि वस्तुमात्रमनिर्वचनीयमपि स्वरूपलक्षण-
लक्षितं सनिर्वचनीयमतस्तयोः परमार्थतो गुण-
गुणित्वे न हि स्थ इति किरणवृत्त्यादिके बहुधा साधितम्।
तदुक्तं च पौष्करे- न गुणी कश्चिदर्थोऽस्ति जडो गुण-
समाश्रयः। गुणा एवानुभूयन्ते गुणिसंज्ञास्तु संहताः।
वैचित्र्यात्परिणामस्य गुण एव गुणो गुणी ॥
गुणानां संहतिर्द्रव्यं विशेषो गुणसंज्ञितः इति।
पुनरस्मान्नास्तिक बौद्धार्हतकादिक सगुण निर्गुण विषय विव-
क्षित खण्डाखण्डाकाराः करण वृत्ति प्रत्यक्ष प्रमेय प्रति-
भासमानात्मात्मेश्वरात्म ब्रह्मवादिनां परमार्थतो
बुद्ध्यात्म चिदात्म वादिनां नैयायिक सांख्य पातञ्जल
वेदान्ति प्रमुखानामपि पदार्थ विषय विवक्षायामिव
स्वार्थ विलय विवक्षायां प्रमात्र सिद्धिं कुर्मेति तथा
137. b. विप्रलोपत्वे जडत्व प्रसङ्गाद्धृदयथापि बुद्धयत्वा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-द्वित्यपि स्व परप्रकाश स्फुरितत्वमात्मेश्वर प्रभूणां
-स्वयमापतेत् । ततस्वार्थ विषयविवक्षायां प्रत्यात्म
नियतैकैकात्म शिव पारमार्थिक चैतन्येषु यथास्वं
प्रत्यग्रूपिण्यामखण्डितायामात्म नाम्न्यां शिवनाम्न्यां
यथा स्वं स्वात्मनि स्वसंविदि सर्वार्थेषु कर्तृरूप सच्चि-
-दानन्द स्वरूपलक्षण शिवत्व भूतेन दृश्य त्वकार्थत्वा-
-द्यां पराक् दृगात्म दृश्य दृग्रूप स्वदृक् दृगन्तरदृग्रूप-
प्रत्यग्दृगात्म स्वदृग्रूपैक दृष्टेर्नातो दृश्यता दृश्यता-
-राहित्येन तत्स्वसंवित्स्फुरणतः प्रतिभासिन्यां वा
दीपस्य स्वप्रकाशे प्रकाशतया प्रभासिनि परप्रका-
-शे स्वप्रकाशेन प्रकाशान्तरेण वा प्रकाश्यत्वं ना-
-स्ति यथा तथा प्रमेयत्वमेव नास्ति । ततस्तां स्वां
स्वां परसंविदं प्रति स्वकीयायाः पुनरविशेषवित-
-स्वकीयाया स्व संविदो वा परकीयायास्स्व संविदः
परकीयायाः परसंविदो वा तत्फलस्य वा प्रमातृत्वं
प्रमाणत्वं प्रमितित्वं च नास्ति । तथापि,

अदृश्यं चेदसद्भावो दृश्यं चेज्जडिमा भवेत् ।
शम्भोस्तद्व्यतिरेकेण रूपं ज्ञेयं विदुर्बुधा इति श्रुते-
-र्यथाकथंचिद्यथा स्वं स्वचैतन्ये विषये चैतन्यान्त-
-र विषये वा प्रोक्तं च तु रूपं स्वकीय चैतन्यं परकीय-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चैतन्यं वा यथार्हं पुनरप्रमातृत्वेन प्रमाता पुनरप्र-
माणत्वेन प्रमाणं पुनरप्रमेयत्वेन प्रमेयं पुनरप्रमि-
तित्वेन प्रमितिः। तत्रापि यथास्वं स्वचैतन्यविषय-
विवक्षायां परसंविदेव परात्मरूपतया परसंविदात्मना
प्रत्यग्रूपतया स्वसंविदा~~त्म~~त्मना च वर्तत इति परा-
ग्रूप परसंवित् प्रत्यग्रूप स्वसंविद्रूपत्वाद्विशेष चिद्रूप-
प्रमातृ प्रयुक्ते तत्परसंविद्रूप प्रमेय विषय स्वार्थ क्रिया-
त्मज्ञान रूप प्रमिति फले प्रत्यग्रूप स्वसंविल्लक्षण प्रमाणे
पराक्षि रूपतया परसंवित्स्वसंवित्प्रमाणस्फुरत्तो
झटिति भातीत्यप्रमेयमपि कथञ्चित् प्रमेयं स्वसंवित्
प्रमाणत्वाद्धि संविद्त्वात् विशेष चित्प्रमाता प्रमाण-
व्यापारस्वसंवेदनं प्रमितिः। ततः प्रमात्रादि चतु-
ष्टयस्य सर्वात्मत्वं प्रतीयते। पुनरत्र परसंविल्लक्षण-
प्रमेयमेव स्वसंविल्लक्षण प्रमाणस्वरूप व्याव्यहिति।
स्वसंविल्लक्षण प्रमाणस्वरूप व्याव्यहिति। स्वसंवि-
ल्लक्षण प्रमाणस्वरूपमिति परत्वार्थ व्याहि प्रमाणात्वर-
पेक्षेति नानावस्था स्वेतर चिद्रूपचित्पदार्थ विषयविव-
क्षायात्तु तद्विशेष चिद्विहिषा स्वसंवित्प्रमाता पर-
संवित्प्रमाणं परसंविदर्थ क्रिया प्रमितिः हृदयत्व-
कार्यत्वाभ्यां च पराक् दृगात्मा दृश्य दृग्रूप ~~प्रत्यग्दृगा~~

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वसदृशदृगन्तरस्वरूप प्रत्यक्दृगात्मस्वदृष्टैक-
-दृष्टेन च क्रमिकस्वभाववस्तु च प्रमेयं ततश्शिव-
138.a. ब्रह्म मुक्त शिवब्रह्म परमात्माकाराभिव्यक्त शिवब्रह्म-
-णां रूपं प्रत्येकं सच्चिदानन्दैकचिद्रूपमेव न तु
चिन्मूलं सत् सच्चिदानन्दैकचित् स्वस्वात्मनि किमपि
तदपि किमिति प्रश्न नैय्यायिकादीनामिव किमपि
तज्जडमित्यापादितम् । यदि तदपि चित्तर्हि तन्मूल-
-क्षोहेरनवस्थादुस्तरतरापतेत् । ततस्सिद्धं चिद्रूपं
तथापि न वेदान्तिनामिव चिन्मात्रं किमपि वा
तावच्चिन्मात्रमित्युक्त चिदचिदोरविशेष दोष स्यात् ।
अथापि वेदान्तिनां चिन्मात्रमपि दुर्लभ त्वेषामभि-
-व्यक्त त्रिगुणात्मिका प्रकृतिरेव मायेति तदुत्भूत बुद्ध्या-
-दि क्षित्यादि तत्त्व तात्विकोपरि माया महामायो भूत-
-तत्त्वगुणात्म प्रकृति मूलानभिव्यक्त गुण प्रकृत्यादि
शिवान्ततत्त्व तात्विक तत्प्रति बन्धक सम्भवात् ।
महामाया मायो भूतो न्मनी मूलान्तरूपरि चोन्मिषच्चि-
न्मात्रन्तु शिवागमैक दृष्टं सतान्तरदृगदृष्टन्तु परत्व-
शिवात्मनोपास्यं सर्वथा भवितव्यम् । यथा कथं-
चिद्विवत्व मुक्तं शिवदीक्षितैस्तच्चिन्मात्रमुपासितं
चेत् । चातुष्कालन्तु जानीयात् पुरुषं लोकपावनमिति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्रुतौ शिवतत्त्वाधश्च कुण्डलबिन्दुतत्त्वप्राप्तिहेतुर्भवति।
पुनः कथञ्चित् प्रकृतेरुपरि च तद्विविक्तमदृष्टमपि
दृष्टमिव कृत्वा सांख्यपातञ्जलवेदान्तिभिरात्मवादि-
भिरदृष्टशिवैरुपासितं शगतत्त्वाधः पुरुषतत्त्वप्राप्तिहेतु-
र्भवति। तदुक्तम्, वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे
स्थिता इति। स्वच्छन्दे, भित्त्वा तु व्यापिनीं देवि समनायां
मनस्त्यजेत्। मनसा तु मनस्त्यक्त्वा जीवः केवलतां
व्रजेत्। जीवो वै केवलस्तत्र आत्मज्ञानक्रियान्वितः।
बन्धनाशेषनिर्मुक्तः सत्तामात्रं व्यवस्थितः ।
समस्ताध्वपदातीतः शुद्धविज्ञानकेवलः ॥
गृह्णाति न परं भावं नापरं च शिवात्मकम् ।
परापरविनिर्मुक्तः स्वात्मन्यात्मा व्यवस्थितः ॥
आत्मव्याप्तिर्भवेदेषा शिवव्याप्तिरतः परम् ।
पाशावलोकनं त्यक्त्वा स्वरूपावलोकनं हि यत् ॥
आत्मव्याप्तिर्भवेदेषा शिवव्याप्तिस्तोऽन्यथा ।
सर्वज्ञादिगुणा येऽर्था व्यापकान् भावयेद्यदा ॥
शिवव्याप्तिर्भवेदेषा चैतन्ये हेतुरूपिणी ।
बन्धनाशेषभावेन सर्वाध्वोपाधिवर्जितः ॥
विदित्वा परमं तत्त्वं शिवत्वं कल्पितन्तु यैः ।
तदात्मोपासका ये ते न गच्छन्ति शिवं परम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आत्मतत्त्वगतिं याति आत्मतत्त्वानुरञ्जितः ।
तस्मादात्मा परित्याज्यो यदि शुद्धिमिहात्मनः ॥
आत्मतत्त्वं ततस्त्यक्त्वा विद्यातत्त्वे नियोजयेत् ।
उन्मना सा तु विज्ञेया मनस्सङ्कल्प उच्यते ॥
ससङ्कल्पस्स्वयतो ज्ञेयमुन्मनं युगपत्स्थितम् ।
तस्मात्सा च परा विद्या यस्मादन्या न विद्यते ॥
विद्यतेऽन्यत्र युगपत् सर्वज्ञादिगुणान्परान् ।
वेदनाद्व्याप्तिधर्मस्य परमात्मप्रबोधनात् ॥
व्यञ्जनात्परमार्थस्य तस्माद्विद्येति सोच्यते ।
तत्रस्थो व्यञ्जयेत्तेजः परं परमकारणम् ॥
परस्मिंस्तेजसि व्यक्ते तत्रस्थश्शिवतां व्रजेत् इति

किमपीत्युक्तेऽपि किमपि वस्तुमात्रमित्यव्याहत व्यावर्तकलक्षणत्वात्सत्सत्यं सत् सत्यमपि भूतं स्यात् तत्पदं किमपि शिवतमित्यादि श्रुतिरपि प्रोक्तवद्रूपेण स्वयं भासनात् दृश्यादृश्यत्वमात्राविषेधका । तदुक्तं किरणे :- ग्राहकत्वाद्विनश्शक्त्यो ग्राहकत्वात्प्रमाणपि । नाभावाद्ध्रुवमित्युक्तमन्यापेक्षतयात्मविति । ननु तर्हि तद्रूपं सच्चिदानन्दलक्षणकम् भवतु । तन्नाधाराधे-यत्वेतरयोरनभिमतं नैय्यायिक मीमांसकादीनाम-भिमतानिरुपचरित निर्गुणत्व निर्लक्ष्यत्व निर्वचन-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निराकारकं सगुणत्व सलक्षणत्वं समापतेत्। ननु +
तस्याश्रयाश्रयि भाव तटस्थ लक्षण निर्मुक्त सच्चिदा-
नन्दरूपस्वरूपलक्षणम् भवतु। तथा भवतु। तत्र
चिन्निर्विषया सविषया वा। यदि निर्विषया
तर्हि चिदचिदो रविशेष दोष ग्रस्ता स्यात्। न चा-
चितो सत्यत्वान्नैष दोष इति वाच्यम्। वेदनार्थ-
-क्रिया विधुरत्वान्मृषा सत्यचितोपि सत्यत्वादचित्स्यात्।
यदि सविषया प्रपञ्चस्य सत्यत्वमनभिमतं
समापतेदिति। तत्प्रपञ्चस्य सत्वात् किंचिद्वि-
-षया चेत् क्वचिदज्ञा स्यादिति सर्वविषया सर्वज्ञाभ्यु-
-पगन्तव्या। न तु सतो सदपेक्षत्वाच्चितो चिदपेक्षत्वा-
-दानन्दस्याप्यनानन्दापेक्षत्वाच्चितः पुनश्चेत्यापेक्षा-
-त्वात् सर्वज्ञत्वस्यापि सर्वापेक्षत्वादिदं सर्वं तटस्थ-
-लक्षणं सदौपाधिकं स्यादित्यनुमानात्। तत्पदं किम-
-पि स्थितमिति श्रुतेश्च किमपि किंचिदस्तीति
गम्यते। तन्न किमपि किञ्चित्सदपि मूढं पुनरप्रबो-
-धनम् असद्सत्यं वा पर्यवसितम् भवतां भवतु
मास्माकम्। तर्हि कथमिदं श्रुतिः कथयति। सत्यं
दृश्यादृश्यत्वन्निषिध्यादृङ्मात्रं कथयतीति प्रागेवोक्तम्।
न हि सापेक्षत्वात् सर्व मिदमौपाधिकम् किन्तु स्व-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-रूपमेव । सर्वज्ञत्वन्तु किंचिज्ज्ञत्वेनैव चिन्मात्रेण
न विरुध्यते । ततो यथा सूर्यस्य सर्वप्रकाशस्य सर्वग्राह्य
घटकाष्ठादि सापेक्षत्वेपि सर्वप्रकाशकत्व सर्वग्राहक-
-त्वरूपम् स्वरूपमेव । तत्र कदाचित् प्रकाशकत्वा-
-ग्राहकत्व किंचित्प्रकाशकत्व किंचिद्ग्राहकत्वरूपमौ-
-पाधिकं सिद्धम् । तथा सर्वज्ञस्य सर्वकार्यस्य सर्व-
प्रपञ्चस्य सापेक्षत्वेपि सर्वज्ञत्व सर्वकर्तृत्व सच्चिदान-
-न्दैक चिद्रूपं स्वरूपमेव । पुनर्यथा क्षित्यादि सहकारि-
सन्निधि सापेक्षमप्यङ्कुरजनकैरस्वभावं बीजं तथा
सर्वज्ञस्य कार्य सहकारि सन्निधि सापेक्षमपि सर्वज्ञत्व-
सर्वकर्तृत्व सच्चिदानन्दैक चिदेकस्वभावमेव न तट-
-स्थं सर्वज्ञकर्तृत्वादेः गङ्गाप्रवाहादेरिवाज्ञत्वाकर्तृ-
-त्वादि लक्षण तटे नद्ये पाशे किंचिज्ज्ञत्व किंचित्कर्तृत्वादि-
-लक्षण तटे भद्रे पार्श्वे च क्वचिद्दृष्टत्वात् । तद्वत् शिव-
ब्रह्मसुसिद्धमिति कदाचित् सर्वज्ञत्वासर्वकर्तृत्व-
किंचिज्ज्ञत्व किंचित्कर्तृत्व भोक्तृत्वरूपमौपाधिकम्
134. a सिद्धन्ततो भेदधिक्कारादिषु ब्रह्म न सर्वज्ञं धर्मित्वात्
घटवदित्यादिन्यायतत्त्वज्ञैर्वेदान्तिभिरुक्तानि प्रतिक्षि-
-प्तानि स्वप्रकाशमात्रं सच्चिदानन्द स्वरूपं स्वरूप-
-मिति तत्मोदेशिकैरुक्तमपि दुरुक्तं स्यात् । तथाहि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

परप्रकाश इत्यत्र उच्यते परपदार्थ प्रपञ्च शून्यत्वात्
प्रकाश पदार्थं परप्रकाश शून्यत्वमिव स्वप्रकाश इत्यत्र
स्वपदार्थस्यान्यथा वक्तुमशक्यत्वात् स्वपदार्थः पर-
प्रकाश इति स्वपदार्थं परप्रकाश शून्यत्वात् प्रकाश-
पदार्थं स्वप्रकाश शून्यत्वमपि स्यादापातेति न
प्रपञ्च शून्यमात्मनि न्यूनचित् सर्वशून्यं भवेदिति
अवाच्यत्वं भवेत्। तत्स्वार्थ सार्थ परार्थ विषयं
स्वपर प्रकाश सच्चिदानन्दैक चिद्रूपं स्वरूपमिति
स्वीकर्तव्यम्। तत्र शिवेन सह मुक्ति समरसीभावमात्रं
न मुक्तिः। पाशानामपि पाशमुक्तत्वात्। नापि तेन सह
शिव समरसीभाव मात्रं मुक्तिः। प्रोक्तरीतेः स्वसंविदात्म
शिवस्य परसंविदात्मकतया विना शून्यत्वात् पर्यवसितो
मोक्षः। मुक्ति समरसीभाव शिवसमरसीभावात्मक एव।
तत्र स्वप्रकाशिका स्वसंवित् स्वार्थ विषया प्रत्यक्-
शान्त गर्व संरंभावधानात्म ह्रींकारैकार्थ क्रियावृत्ति स-
विशेषोपि तस्या स्तत्गर्व संरंभावधानोल्लिखित परार्थ-
विषय पराक् बोधोज्जृम्भ संकल्पात्मक ह्रींकारैकात्म-
परसंविदर्थ क्रियां प्रत्यन्तर प्रमेय स्वविषयत्व सु-
रक्षित सूक्ष्मत्वात् सूक्त निर्विशेषा सा स्वसंविन्निज-
संज्ञिता। परप्रकाशिका परसंवित् प्रोक्त ह्रींकारैकार्थ-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

क्रिया वृत्ति रविशेषावृत्ति संज्ञिता । तथापि न हि द्वे
ज्ञाने स्तः । किन्तु स्वसंविदिदं प्रथम पराग विकृति-
भ्रमणक्रमण स्वरूप परार्थ सर्वार्थ विषयार्थ क्रियाक-
-प्रयत्नरूपशक्ति संज्ञित परसंविदिति पुनः परसंविदि-
-दं प्रथम प्रत्यगादि वृत्ति भ्रमण क्रमण रूप स्वार्थैकार्थ-
विषयार्थ क्रियाक प्रयत्नरूप ज्ञान संज्ञित तदुभयान्तर-
-विशेष चित्पृथक् वृत्ता स्वसंविद्व्यपि वृत्तभेद-
सर्वार्थ ज्ञक्रियैकात्म त्रिविधैकधा वृत्त पर संवेदन स्व-
संवेदनात्म द्विधैकधा वृत्तैकार्थ क्रियाक कर्तृ करणात्म-
त्रिविधैकधा वृत्त द्विधैकधा वृत्त सच्चिदानन्दैक शिव-
चिद्रूपैकं सात्वं पर्यवसितम् । सच्चिदानन्दमित्यत्र
चितः प्राधान निरस्त निर्विषयत्वात् सतोऽप्यविनाश-
-रूपत्वात् सांसारिक प्रथितानन्दस्यापि सत्वगुण वृत्ति-
-रूप सुख रूपाभिव्यक्ति स्वरूपत्वात् । लौकिकोऽप्यानन्द-
स्तस्य लक्षण निर्मुक्त निष्पन्न स्वरूप लक्षणान्त-
-स्य सहज सर्वज्ञतादि षड्गुण स्वभेद सच्चित्सर्वज्ञ-
कर्तृत्व रूप स्वरूप लक्षण स्थित तस्याप्य शिवत्वाभि-
-व्यक्तिरेव नान्य इति सुपरीक्षत्वात् । स चानन्दोऽप्य-
-नादि मुक्तादि मुक्त शिवयोः समानत्वात् सच्चिदानन्द-
रूप लक्षणमपि तथा तयोः स्थितम् । न किञ्चिदन्तरम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

139. a. तथात्वेऽपि केचिदाधुनिका वेदान्त व्यवहारचोरा ब्रह्म-
सिद्धान्त व्यवहारशैवा ह्यस्यानन्द शिवब्रह्मणः
कश्चिदखण्डैकरसस्वामि सम्बन्ध निर्मुक्ति, निष्पन्न-
स्वरूपलक्षण भूत गुणवृत्ति कृत्वा तस्य मुक्त सच्चित्त्वात्
सच्चिदानन्दादि तथाभूत स्वरूप लक्षणानन्त कल्याण-
गुण लक्षणं विशिष्टं शिव ब्रह्मणो मात्रं मुक्त शिवब्रह्म-
णां मुक्तात्मनोऽपि शिवा इति श्रुते शिवत्वमस्ति
यद्यपि तद्भिन्नलक्षणत्वात्तथापि शिवसाम्याभावात्
न शिवसाम्य मुक्तिरिति कथयन्ति। ते पुनस्तथा
मुक्तशिवब्रह्मणां तथाभूत सच्चिदानन्द रूपाभावात्।
असत्यत्व जडत्वासम्पूर्ण मनोरथत्वादिकमापतेत्। पुन-
-स्तथा तत्प्रीते शिवात् किञ्चिन्न्यूनत्वमुक्तं तन्निरूप-
-मस्ति मुक्तस्य संपूर्णमनोरथत्वमेवापतेदित्यबुध्यन्तः
पुनः प्रोक्तरीत्या सच्चित् सर्वज्ञ कर्तृत्व रूप स्वस्वामि-
सम्बन्ध निर्मुक्ति, निष्पन्न स्वरूप लक्षण भूत शिव-
-त्वाभिव्यक्तैरेव गुण प्रकाश गुण पूर्ति भूत गुणात्म-
त्वेनानाद्युदय मात्रमविवक्ष्य शिवस्यापि तथेत्यख-
-ण्डैकरस शिवैकरसता शब्दार्थ शिवानन्द समान शिव-
समान शिवीभूत स्व शिवानन्द इत्यप्यजानन्तो भ्रान्तो-
-ताः प्रतिष्ठिताः। तदानन्द शब्दार्थ समर्थित श्रीमता

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

रामकण्ठेन किरणवृत्तौ । किरणाख्यं महातन्त्रम्
परामृतसुखप्रदमित्यत्र परं च तत्सर्वार्थव्यापकत्वात्
अमृतं चाविनश्वरं यत्सुखं परापरि पूर्णता सर्वज्ञत्व सर्व-
कर्तृत्वाभिव्यक्तिस्तद्ददात्युपायत्वेनाभिव्यनक्तीति
परामृतसुखप्रदम् । व्योमव्यापिस्तवेऽपि ; जातिनिर्मोचने
नैतन्मुक्तिसुखं पूर्णतानन्दात्मापि तु । सर्वेभ्यो भूतेभ्य-
स्सुखप्रदो यो नमोऽस्तु तस्मैतः इति । तदुक्तं च रौरवे :

एवं दीक्षाविशुद्धात्मा देहस्थोऽपि न देहभाक् ।
निर्दग्धाशेषपाशत्वाज्जीवन्मुक्तश्शिवेव धीः ॥
देहपाते चिदानन्द शिवैकरसतां व्रजेत् ।
न पुनर्भेदमायाति सरितो यान्ति वाम्बुधौ ॥
निजानन्दं सदा पश्यन्नपश्यत्यखिलं जगत् ।
सत्तामात्रं जगत्सर्वं पश्यन्नपि न शोग्यतः ॥
साक्षात्कारे समाधौ तु सर्वथा न हि पश्यति ।

पुनरपि रौरवे : एवं शैवाध्वरं प्राप्य दीक्षामन्त्रसमुद्भवम् ॥
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः ।
छिन्ने देहे शिवो भूत्वा शिवधर्मसमन्वितः ॥
शिवानन्दमनुप्राप्य न विभागाय कल्पते ।
जलं समुद्रमासाद्य नहि मृष्टाम्बुवाहिनी ॥
क्षारतोयत्वमायाति प्रभावाद्धि महोदधेः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एवं वै देहि भिन्नात्मा शिवमेवाधिगच्छति ॥
गुणसाम्यमात्रैकदेश दृष्टान्तः । नोत्तरत्र विवेच्य-
माण विशिष्टाद्वैत शिवज्ञया सर्वात्मना । तदुक्तं
सिद्धान्त रत्ने - क्षीरे क्षीरमिवाभिन्नं विभिन्नन्दृ-
-ष्टिदृष्टवत् । शिवात्मनोस्साकारस्यं व्यज्यते गुण-
-साम्यत इति । निश्वास कारिकायां च ।
140. a. पशुभावाद्व्यतीत्य पतिभावेन तिष्ठति ॥
ततस्य मननान्नाम सर्वगे गमनं श्रुतः ॥
उन्मनत्वं शिवत्वं च प्रयातीत्युपचर्यते ॥
सम्बोधो मननान्नाम सर्वगे गमनं श्रुतः ॥
मृगेन्द्रे च - तद्धामं सम्बोधो अनन्तदृक्क्रियो द्वयः ।
अधिकारस्तु साम्राज्यं भोगो मुक्तो निजः परः ॥
पाशातीतो महानित्यो व्ययस्तत्त्वयोगितेति ।
सकले निष्कले चैव सर्वत्रैव समानता ॥
सायुज्यमिति तत्प्रोक्तम् सारूप्यं मूर्तिकल्पना ।
सर्वज्ञाद्यं शिवैश्वर्यं यत्तु स्वात्मनि राजते ॥
तत्सायुज्यमिति प्राहुर्वेदागम परायणाः ।
इति चिन्त्य विश्व विद्या सार संहिता श्रुतेः । शिवब्रह्म-
मुक्तशिवब्रह्म परमात्मान्तरनभिव्यक्त शिवब्रह्मणां
स्वरूपं प्रत्येकं शिवत्वरूपितमभिव्यक्तमनभि -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-व्याप्तं सदृशं स्थितम् । तदुक्तं कामिकादिके शिव-
-रूपम् । सहजानन्दसन्दोह स्वसंविल्लक्षणात्मकम् ।
परसंवित्स्वरूपिण्या शक्त्या परमया युतम् ॥
अन्यत्र च, आनन्दाभिमुख्यं प्रत्यक्ब्रह्मार्थाभिमुख्यं
प्रयात् । रत्नत्रये । परानपेक्षं रूपं यद्विज्ञानं शिवसंज्ञितम् ।
तस्य शक्तिः परापेक्षं रूपमाहुर्मनीषिणः ॥
इच्छाकार्यमनिच्छापि कुर्वाणेच्छा निगद्यते ॥
ज्ञानमज्ञानरूपैव मक्रियापि क्रिया तथा ॥
पौष्करे - अनबोधो ज्ञानबोधहेतुरविशेषात्मिका चितिः ।
शक्तिरुक्ता विकल्पा सा महती मूर्तिरैश्वरी ॥
कामिके - शिवतादात्म्यरूपम् ।
नापि देहो न चाक्षाणि न प्राणो न मनस्तथा ।
नाहंकारो न बुद्धिः स्यात् स्वपरत्वात् भावतः ॥
जीवत्यपि सुषुप्त्यादौ व्यासङ्गे नैव लक्ष्यते ।
अतः प्रदीपवद्भाति प्रेरयन्नखिलं वपुः ॥
निसर्गेऽपि च चैतन्ये सर्वगे सर्वकालिके ।
अनादिमलसञ्छन्नो न जानाति स्वयं प्रभुः ॥
तस्मात्परोक्षं विज्ञानं स्वस्वरूपावभासकम् ।
पौष्करे - यन्नित्यरूपं विज्ञानं तच्च निर्विषयात्मकम् ।
पक्षोऽध्यक्षनिरस्तोऽयं स्वपरग्राहकत्वतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अणोः प्रत्यक्षसिद्धत्वान्नानुमाहृत्य क्व बाधिका ।
न च निर्विषयं ज्ञानं परापेक्षं स्वरूपतः ॥
किं चानुभूयते ह्यात्मा स्वपरात्मप्रकाशकः ।
परप्रकाशकत्वं च नित्यनित्यगुणो यतः ॥
स्वपरग्राहकस्तस्मात् सर्वज्ञात्मा व्यवस्थितः ।
तद्वत्स्वतोऽमी सर्वज्ञाः किंचिज्ज्ञत्वं तु कारणात् ॥
मृगेन्द्रे :- एवमातिष्ठतस्तस्य विनैवाकारकल्पनाम् ।
अकिंचिच्चिन्तकस्यास्य रूपमुन्मीलति स्वकम् ॥
सर्वार्थदृक्क्रिया रूपमानन्दमयमव्ययम् ।
पौष्करे :- परार्थमात्रसंवित्ति रूपत्वाद्भुक्तिसंज्ञितम् ॥
सहजत्वस्य तद्वीर्यं तन्मलेन निरुध्यते ॥
तस्मिन्निरुद्धे तत्कार्यं प्रत्यर्थं नैकधात्मकम् ।
न जायते ततः कार्यं तिरोधानमलाश्रितम् ॥
कामिके :- ज्ञानवृद्धिविधानाख्यातं वृत्तिरूपं निजं तथा ।
निर्विशेषं निजं शुद्धं नैवोपप्लवते स्थिरम् ॥
वृत्तेरमी विशेषास्तु संविदो बाह्यसंमताः ।
मले क्षीणे ते जन्तोर्बुद्ध्या शिवविषया ॥
तथा च स्वभावबुद्धिर्बुद्ध्या सह विजृम्भते ।
निजतेजो व्यद्वीद्य मलावरण बाधियत् ॥
पराख्यायाम् :- चिद्रूपमात्मनो रूपं दृक्क्रिया गुण-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

140.b. -लक्षितम् ॥ ज्ञानरूपस्य तस्यापि स्वरूपत्वं क्रिया-
-त्मकम् । मृगेन्द्रे — "चैतन्यं दृक्क्रियारूपं तदस्त्या-
-त्मनि सर्वदा । सर्वतश्च यतो मुक्तौ श्रूयते सर्वतो
मुखम्" इति ॥ तथा ग्रन्थान्तरे — "योगिनस्सर्वथा स्वं
ज्ञान कर्तृत्व लक्षणम् । स्वतन्त्रमनवच्छिन्नम् स्व-
-स्वरूपं प्रकाशते" इति । तदेवं स्वरूपलक्षणसिद्धः
प्रोक्तरीत्या निर्गुण निष्कल निष्कलातीत शिवमुक्त शिव-
-शिवत्वाहं विविक्तात्मनां स्वरूप वैराग्यादिक पात-
-ञ्जल वेदान्तिनामिव खण्डाखण्ड मनोबुध्यहङ्कार-
-वृत्तिगोचरम् । प्रकृति प्रभृति बन्धनाच्छन्न कृत वि-
-विषयत्वकृतं जडकल्पचिन्मात्रं समाधिभूतं
स्वपर साक्षात्कारविधुरम् कैवल्यं पर्यवसितशून्यं
स्वप्रकाशमात्रं वा न स्यात् । किन्तु चैतन्यात्
शून्यकल्पत्वाद्दूषणाद्वा ततस्साक्षाच्छिव सन्नि-
-हितस्य सिद्ध समवायि भूत शिवयोग संस्कृतेस्सर्व-
-था विस्मरणीय शिवत्वाभिव्यक्तिर्निर्विकारापरो-
-क्षत्वेन भाव व्युत्पत्तिक साक्षात्कारपरनामकया प्रमि-
-तिरूपेण चिद्रूपकर्तृ क्रियालक्षणेन भावार्थेन
प्रत्यक्षेण पुनरपरोक्षात्मतादात्म्यत्व स्फुरण-
-स्फुरितम् कर्म व्युत्पत्तिक साक्षात्कारनामानम्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथाकथञ्चित् प्रमेयरूपं कर्म्मार्थं प्रत्यक्षं शिवं
दिदृक्षोर्जीवन्मुक्तसिद्धशिवयोगिनस्संनिधाने ना-
करणाकृतिरिति तत्साक्षात्कारार्थं करणभूते पुनर-
-परोक्षाख्ये करणव्युत्पत्तिकसाक्षात्कारपरनाम्नि
प्रमाणरूपे चिद्वृत्तिलक्षणे करणार्थे प्रत्यक्षे लक्षे-
-शैवैः प्रासादमन्त्रकलादिव्यवधानाद्युन्मयसाक्षात्कृ-
-तसन्निधानात्तः प्रत्यक्षनाम्नि शिवशक्तिश्चिद्वृत्ति-
व्यक्तिका पुनस्तद्दृढ्योगाख्यशिवसाक्षात्कारार्थ-
-मद्य योगाख्यः यानेन शिवं बुभुक्षोर्नानाकृतिरिति।
परोक्षाख्येनानुमितिरूपेण चिद्वृत्त्यर्थं क्रियालक्ष-
-णेन भावव्युत्पत्तिकेनानुमानेन तत्कर्म्मत्वस्फुरण-
-स्फुरितं कर्म्म व्युत्पत्तिकानुमाननामानं शिवनिष्ठा-
-सोर्जीवन्मुक्तसाध्यशिवयोगिनस्सन्निधानि ना-
करणाकृतिरिति योगाद्, तत्परोक्षज्ञानार्थं करणभूते
प्रत्यक्षेणान्यथा वा कार्यमात्रस्य कर्तृमात्रेण। वाचक-
-मात्रस्य वाच्यमात्रेणापि व्याप्ते स्सिद्ध्, तस्य च ग्रहणात्।
अनात्मकर्तृसाधनप्रवृत्तकार्यत्वलिङ्ग्, कलितव्याप्ति-
ग्रहणाहितसंस्कृतिसमुद्भूतिसमुत्थबोद्धबुद्ध्युपहित
चिदंशव्याप्तिस्मृतिवृत्तिके क्वचित् कस्यचिन्मते
स्वतोनुमानाख्येन सिद्धान्ते चिद्वृत्तिलक्षणानुमान-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-व्यञ्जकत्व मात्रोपचार शिवानुमानाख्येन लिङ्ग-
-कलितेन विकल्पात्मकेन बौद्ध प्रकाशमर्शेनोपहित-
तथानुमानाख्य सविकल्प त्रितीय ज्ञानात्म लिङ्ग विषय
निर्देश परामर्श रूप वृत्तिमति प्रमाणरूपे चिद्वृत्ति
लक्षणे करण व्युत्पत्तिकेनुमाने लक्ष्ये बुद्धि व्यव-
।म। a -धान कृत सन्निधाना ततोनुमान नाम्नी शिवशक्ति-
त्रिचिद्वृत्ति व्यञ्जका पुनस्तद् दृढ योगाख्य साक्षा-
त्कारार्थसाद् योगाख्य दशानेन शिवं युक्तोर्शीला
कृतिरिति परोक्षाख्येन प्रमिति रूपेण चिद्वृत्त्यर्थ-
-क्रियालक्षणेन भाव व्युत्पत्तिकेन शिवागमेन तद्धक-
-र्मत्व स्फुरण स्फुरितं कर्म व्युत्पत्तिका गमनामानं
शिवजिज्ञासो र्जीवन्मुक्त साहय शिवयोगिन स्संबन्धि-
-नि नाकरणाकृते रिति योगाद्रू तत्परोक्ष ज्ञाना र्थन्त-
-कारण भूते श्रुतावीत बृहद्रूपाख्य कामिकादि वातुल-
-न्त शिवागम तन्त्र मन्त्र पदवाक्य वाच्यवाचक-
सङ्केत ग्रह पूर्वक काव्य ज्ञापक भावसम्बन्धाख्य-
वाचक शक्ति ग्रहाहित संस्कृति समुद्भूति समुत्थ-
बौद्ध वृत्त्युपहित चिदंश सङ्केत स्मृति पूर्व शक्तिस्मृति-
वृत्तिके क्वचित्करस्य चित्क्ते इवत आगमाख्येन
सिद्धान्ते चिद्वृत्ति लक्षण शिवागम व्यञ्जकत्व-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मात्रोपन्चार बीज शिवागमाख्य शिव शब्द विषयेण।
ततः कथंचिद्गमाख्येन विकल्पात्मकेन बौद्ध-
-प्रकाशेनोपहित तथागमाख्य सविकल्पतच्छब्दार्थ-
-विषय चिदंश परामर्श रूप वृत्तिमति प्रमाण रूपे
चिच्छक्ति लक्षणे करण व्युत्पत्तिके शिवागमे लक्षणे शिव-
-दिव्यागम शब्दानुविद्धः यात्मक शिवागम शब्द विषय-
-बुद्धि व्यवधानेन कृत सन्निधाना तत आगमवाचकी
शिव शक्तिश्चिच्छक्ति व्यञ्जिका शिवं प्रति स्वतःसिद्ध-
-प्रमाण भूता मुक्त शिवं प्रति निरस्त समस्त प्रमाण-
भाव शिङ्क्षिनी मुमुक्षुं प्रति तच्चिच्छक्ति प्रमाणाभिव्य-
-ञ्जाभि व्यञ्जक सम्बन्धोपन्यासित प्रमाण भावती-
शिव शक्तिश्चिच्छक्ति व्यञ्जिका। तदित्थं शिवशक्ति-
व्यञ्जिते स्वव्यापार शिव प्रमा साधके स्व चिच्छक्ति-
लक्षणे शिव दिदृक्षु सिद्ध शिवयोगि शिव युयुक्षु-
-शिव जिज्ञासु साध्य शिवयोगि विवक्षितैक दिक्क्रमिक-
प्रत्यक्षानुमानागम शिव प्रमाणे शिवं शिवी भूता-
-त्मवर्गं यथाकथंचित्तथा भूत तद्दशात्मात्मवर्गं तथा-
-भूत तद्दर्हे वा स्वात्मानं चाभिव्यक्त विविक्त शिव जीव-
वर्गं च साक्षाच्छिवं दिदृक्षुः सिद्ध शिवयोगी शिवं युयुक्षु-
शिव जिज्ञासु साध्य शिवयोगी च क्रमिकं साक्षात्पश्यति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

साक्षात्कारार्थं ध्यानार्थं ज्ञात्वा कुर्वानमिति व्यवहितं
जानाति । इत्यादिति समाधत्ते च पुनः कथमुच्यते ।
कैश्चिद्वैशाखिभिरिव कैश्चित् सिद्धान्तिभिस्सर्वज्ञतादि
षाड्गुण्यपरिपूर्णं स्वपरप्रकाश सच्चिदानन्दादिकं
तटस्थलक्षणमिति प्रोच्यते । तदयुक्तं तथा चेत्
पुनश्शिवमुक्त शिवापरमुक्त शिवानभिव्यक्त शिवा-
-त्मनां रूपं कीदृक् वक्तव्यम् यदि किमपि किंचिदुच्यते ।
तर्हि चिदचिदात्मकं च यमेव वस्तु तृतीयं नेति
परीक्षितव्याच्चिदात्मकं पुनरचिदात्मकं वा स्यान्नोचे-
तद्भुवं वा स्यात् पुनरचिदात्मकमनभिमतमिति
मा. ८. चिदात्मकं चेत् । तर्हि तच्चिन्मात्रमित्युक्तेऽपि शेषा-
-पेक्षिका स्वापेक्षिका च सती स्वप्रकाश स्वसंवित्
-परप्रकाशपरसंवित्त्व भूत्वा सान्वित सहज स्वरूप-
सदानन्द सर्वज्ञतादिभिस्सह सिद्ध्येत् । ततः प्रोक्त-
सच्चिदानन्दात्मकं लक्षणं श्रीवेदोपगूहतीतिवत्
जगत् सत् सृजति चित् सृजति आनन्द स्सृजतीत्यत्र
पुनरजहल्लक्षणया श्रीतगीवत् सच्चिदानन्दात्म शिवात्म
वाच्यार्थं लक्ष्यालक्ष्यार्थयोर्भेदे सच्चिदानन्दात्म
वाच्यार्थस्यापि तटस्थलक्षणत्वाभावेन तादात्म्येन
पृथक् सिद्धमिति पृथग्विवाहित स्वरूपसिद्धत्वाभावात्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवत्वमेव शिवतादात्म्येन स्वरूपलक्षणमेव भवति।
गङ्गायां घोष इत्यत्र जहल्लक्षणया वाच्यभूत गङ्गात्वस्य -
घोषाधारत्व वाच्यार्थस्य तद्भूत तीरत्व घोषाधारत्व -
-लक्ष्यार्थयोरेकतादात्म्यभावेन गङ्गाधारत्व घोषाधेय-
त्व विवक्षित स्वस्वामित्वाभावाद्यदिदं लक्षणं तटस्थ-
लक्षणं तद्वत् सच्चिदानन्दादिकं तदुभयलक्षणत्वं न भवति।
पुनस्तद्रूपलक्षित शिवक्षेत्रत्वमसीत्यत्र जहदजहल्लक्ष-
णया भूतात्मादि सकलात्म पञ्चात्म योगिष्वनवगतमेव
प्राणायामादिषडङ्गोपलक्षित साकल्य शिवयोगे [illegible] योगे-
न तदसामर्थ्ये तथा तच्छब्दतमेन विवेकमात्रोपलक्षित-
साकल्यशिवयोगेन ज्ञानयोगेन वा शिवज्ञानत्वं पदवाच्यार्थ
भूतात्मान्तरात्म जीवात्म सकलात्म पञ्चात्म जीवत्व -
-मुपाधिमात्रत्वं पदलक्ष्यार्थसि पदलक्ष्यार्थ शिवत्वादि-
लिङ्गात्मात्मत्वमित्युक्त तटस्थ लक्षण स्वरूप लक्षणो-
भय लक्षणात्मकं यदिदं लक्षणं तद्वत् सच्चिदानन्दा-
दिकं तदुभय लक्षणात्मकं च न भवति। पुनस्तद्रूप-
लक्षित शिवक्षेत्रत्वमसीत्यत्र जहदजहल्लक्षणया प्रोक्त
योगेष्वनवगतमेव शिवज्ञान तद्रूपलक्षित शिव-
पदवाच्यार्थ भूतात्मादि सकलात्म पञ्चात्मत्वोपरि
श्रा··· गमात्रोपहिताधः कथंचिदणुत्वस्वरूपहा -

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शक्त्यादि सहितापरपतीश्वरत्वमुपाधीयमानं तदुपल-
-क्षित शिवपदलक्ष्यार्थ परशिवत्वमित्युक्त तटस्थ-
लक्षण स्वरूप लक्षणोभय लक्षणात्मकं यदिदं
लक्षणं तदुक्त सच्चिदानन्दादिकं तदुभय लक्षणात्मक-
-त्वेन भवति । पुनस्तदुपलक्षित शिवकर्तृत्वमसी-
-त्यत्र जहदजहल्लक्षणया प्रोक्तयोगेष्वन्यतमेनैव
हीयमानासि पदवाच्यार्थ साक्षात्कारवद्भिर्नय ध्यान-
-स्तिमितो दृष्टिवन्निश्चल ध्यानात्म समाध्युपा-
-त्तक्रमिक चिन्मात्रात्मत्व परशिवत्व द्वितयमुपा-
-धीयमानासि पदलक्ष्यार्थ शुद्ध शिवत्वमित्युक्त स्वरूप-
लक्षणत्वं पातञ्जलयोपचारित तटस्थ लक्षण स्वत-
142.a स्वरूपलक्षणोभय लक्षणात्मकं यदिदं लक्षणं तदु-
क्तात् सच्चिदानन्दादिकमपि श्रुतात्माद्यमन्त्रात्मान्त-
पञ्चात्मत्वोपहितत्वादनुपहितं च स तटस्थलक्षण-
-स्वरूप लक्षणोभय लक्षणात्मकं स्यात् भवति । सत्यम् ।
जहदजहल्लक्षणया तटस्थ लक्षणे पञ्चात्मत्वे हीय-
माने सत्युपाधीयमान सच्चिदानन्दादिकमवशिष्य-
तदुपलक्षित शिवपदलक्ष्यार्थ परमात्मो पर्यसि पद-
लक्ष्यार्थ शिवीभूतवत् त्वं पद लक्ष्यात्मानमुपलक्ष्य-
स्वयमपि पुनरजहल्लक्षणया तादृगात्मनः स्वरूप-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लक्षणं भूत्वा तिष्ठतीति न कोऽपि विरोधः । ननु
पुनरनन्तशक्तिविश्लेषो वानप्रस्थत्वमिष्यते ।
केवलं शिवसद्भावो यतित्वमिति निर्दिशेत् ॥
इत्यनन्तशक्तिविश्लेषत्वं कथमिदं श्रुतिः कथयति ।
सत्यम् । सर्वज्ञतादि षड्गुणमध्ये पठितानन्तशक्ते-
-रनादिमहद्विधानाव्याहतार्थत्वात् पुनरत्रानन्तशक्ति-
विश्लेषत्वं नाम तदेवं विषयानन्त्यात् भेदानन्त्यं
प्रपद्यते । कर्तृत्वं तद्धि भिन्नत्वात् तद्भेदो पत्यारत इति
मृगेन्द्रश्रुतेर्महाप्रलयेन योगविवेकभावनया वा
कृतशेषकार्यात्म विषयप्रलये शेषकार्यविषयो-
पाधिक विषयोपाधिक विभागभेद विवक्षितज्ञान-
क्रियार्थक्रियानन्त्यवैकल्यात् । तथा तत्कृतक्षुद्रिक-
शक्त्यानन्त्यवैकल्येन शक्तिरेकैव स्थितेव इति श्रुतेः ।
परार्थस्वार्थद्विसंविद्वात्मैकशक्तित्वं अनन्तशक्ति-
विश्लेषत्वमेतदेव वानप्रस्थत्वमत्रापि स्वसंविन्मात्र-
विवक्षया केवलं शिवसद्भावो यतित्वं नान्यदिति
कथयति । तत्रापि । तमाश्रमस्त्वधिकारस्य निवृत्तेस्तत्
पदि स्थितौ । ज्ञानक्रियानन्त्यं जगद्बन्धु-
-रणोऽशिव इति पुनः श्रीमन्मृगेन्द्रश्रुतेः । अवि-
-भागेन स्वरूपतोऽनन्तं गतोऽसद्भेद दृक्क्रियानन्त्यार्थ-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

क्रियानन्त्य वैकल्यात् कारणभेद नियतत्वात् कार्य-
भेदस्येति न च कारणवैकल्यम् विना कार्यं न
जायत इति पौष्करश्रुते स्वकारणानन्त शक्तिविशेषो
पादप्रस्थावमिति न हि ०थारं०वेवम् । तस्यानन्तस्य
स्वरूपत्वात् स्वरूपहाने स्सर्वसिद्ध्य प्रसङ्गात् ।
विशेषतः प्रत्यर्थ वेदन कस्य प्रसङ्गात् मृषवाद्यनु-
पपत्तेश्च ततो ह्यह प्रकाशवदेदि भाग भेदेन शक्त्यानन्त्यं
तत्स्वरूपमेव । तथा हि । न च निर्विषयं ज्ञानं परापेक्षं
स्वरूपतः । इति श्रुतेः । पर संवेद्यार्थ क्रियात्मनापि
वृत्त संवेदनात्म भाव व्युत्पत्तिक ज्ञानार्थ क्रियाकर्त्री-
करण व्युत्पत्तिकैकज्ञानमित्युक्ता शक्तिस्तावत्
स्वसंवेद्यार्थ क्रियात्मनापि वृत्त परसंवेद्यार्थ-
क्रियाकर्त्रीसती परसंविद्युक्तिर्भूत्वा तिष्ठति । पुन-
142.b. सैव परसंविद्युक्तिः कारणभेद नियतः कार्यभेद-
इत्युक्तत्वात् । परसंवेद्यार्थ क्रियात्मनापि वृत्त संवेद्य-
नार्थ क्रियाकर्त्री सती परसंविद्युक्तयात्म स्वात्मनापि
वृत्त स्वसंविद्युक्तिर्भूत्वा तिष्ठति पुनस्सैव परसंवित्
स्वसंवित् द्विरूपा शक्तिस्तथा परार्थ स्वार्थार्थ-
विषयासती ज्ञान क्रिये द्व्यर्थ क्रियाकर्त्री पुनस्तथा
परार्थ स्वार्थ प्रत्यर्थ विषया सती तदन्तर पृथग्रूप-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लक्षितानन्तज्ञानानन्त क्रियानन्तेच्छार्थ क्रियाकर्त्री
सती च क्रियाशक्तीच्छाशक्त्यात्मनापि वृत्ता ज्ञानशक्ति-
-रिति । ज्ञानशक्तीच्छाशक्त्यात्मनापि वृत्ता क्रियाशक्ति-
-रिति ज्ञानशक्ति क्रियाशक्त्यात्मनापि वृत्तेच्छाशक्तिरिति
च भूत्वा तिष्ठति । पुनस्तथान्योन्यात्मनापि वृत्ता
तदनन्तर पृथगुपलक्षितानन्तज्ञानशक्तिरनन्तक्रियाशक्ति-
-स्तौ विभागासत्वनन्तशक्तिरिति च भूत्वा तिष्ठति ।
पुनः कर्तृशक्तिमदिच्छितृशक्तिमदात्मनापि वृत्तो
ज्ञातृशक्तिमान् । ज्ञातृशक्तिमदिच्छितृशक्तिमदात्मनापि
वृत्त कर्तृशक्तिमान् । ज्ञातृशक्तिमत्कर्तृशक्तिमदात्मना-
-पि वृत्त इच्छितृशक्तिमानिति भूत्वा तिष्ठति । पुनरन्यो-
-न्यात्मनापि वृत्तस्तदनन्तर पृथगुपलक्षितोनन्तज्ञातृशक्ति-
मानानन्तकर्तृशक्तिमाननन्तेच्छितृशक्तिमानितिविशिष्ट-
-स्सन् अनन्तशक्तिमानिति च भूत्वा तिष्ठति । पुनस्त-
-दुक्तवर्थक्रियाभूतं संवेदनमेव न च निर्विषयं ज्ञान-
-मित्युक्तत्वात् स्वसंवेदनात्मनापि वृत्त परसंवेदनं
भूत्वा तिष्ठति । पुनस्तदेव परसंवेदनं परसंवेदनात्म
स्वात्मनापि वृत्त स्वसंवेदनं भूत्वा तिष्ठति । पुनस्तदेव
द्विरूपं संवेदनन्तथा परार्थ स्वार्थात्मर्थ विषयं सत्
क्रियेच्छात्मापि वृत्तं ज्ञानमिति ज्ञानेच्छात्मनापि

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वृत्ता क्रियेति ज्ञान क्रियात्मनापि वृत्तेर्द्वेति भूत्वा तिष्ठति।
पुनरन्योन्यात्मनापि वृत्तत्वादनन्तर पृथगुपलक्षितमनन्त-
ज्ञानन्तथा वृत्ता तयोपलक्षितानन्त क्रिया तथा वृत्ता तयो-
-पलक्षिता नन्तेच्छा तत्त्वत्रयाणां ज्ञानत्वाविशिष्टमनन्त-
-ज्ञानमिति भूत्वा तिष्ठति। तदित्थं पुनरविभाग भेदान्तर-
पृथगेकधा द्विधा त्रिधानेकधा वृत्तानन्त्यं शक्तिमत-
श्शक्तेरिच्छाकार्ये क्रियाया वा स्वाभाविकं सिद्धम्। प्रागुक्त
-विभाग भेदनहि: पृथगानन्त्यमौपाधिकं सिद्धम्।
तदुक्तम् रत्नत्रये मृगेन्द्रे पौष्करे च।

इच्छा कार्यमनिच्छापि कुर्वाणेच्छा चिदव्यया। ।
ज्ञानमज्ञानरूपैव सक्रियापि क्रियान्तथा ॥
तमारशक्त्यधिकारस्य निवृत्तेस्तत्परिच्युतौ ।
व्यनक्ति दृक्क्रियानन्त्यं जगत्बन्धुरणो शिवः ॥

मृगेन्द्रः। दृक्क्रिया रूपिणी शक्तिः कथिता परमेश्वर ।
ते च निशेय कर्तव्ये विरहेन कदाचन ॥

न हि यस्मात्परं कार्यं सत कर्तृत्व रूपतः ।
शक्तिकार्ये निरोधानं नतेन कथितं कथम् ॥
143.a. शक्तिर्व्यापृता तरं यस्मात् कार्यं तदुक्त शङ्कर ।
ईश्वरः। न शक्तिरेव कर्तव्यं शक्ति दृक्क्रिययोर्यतः ।
अविभागस्य भागोक्तौ तद्विभाग उपाधितः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रत्यर्थमपि मत्सम्बन्धस्तत्कार्यमितरन्तु यत् ।
परार्थमात्र संवित्ति रूपत्वच्छक्ति संज्ञितम् ॥
सहजत्वस्य तस्यैव तत्समलेन निरुध्यते ।
तस्मिन्निरुद्धे तत्कार्यं प्रत्यर्थं वेदनात्मकम् ॥
न जायते ततः कार्यं तिरोधान मलात्स्थितमिति ।

ततो नादि मध्य निधन निरुपाधिक निरतिशय निरपेक्ष-
कार्यं ज्ञान सर्वार्थार्थ मात्र परात्मतात्म निर्विकल्प ज्ञानात्म-
स्वापृथक्कृतेच्छात्म क्रियात्म द्व्यर्थ क्रियेति तत् ज्ञानार्थ-
-क्रियान्तर विकल्प सविकल्प प्रत्यर्थ सर्वार्थ परात्मता-
-त्म ज्ञानात्म स्वापृथक्कृतेच्छात्म क्रियात्म द्व्यर्थ क्रियेति च
तथा वृत्त स्वार्थ प्रत्यक्, पातात्म ज्ञानात्म स्वापृथक्कृते-
-च्छात्म क्रियात्म द्व्यर्थ क्रियेति च वृतार्थ क्रिया कारणेन
सर्वज्ञतादि पञ्च सहकृत सच्चिदानन्दादि पञ्चलक्षणार्थेन
सर्वज्ञत्व सर्वकर्तृत्व संज्ञित सर्वार्थ ज्ञानशक्ति सर्वार्थ-
क्रिया शक्ति द्वैत शक्ति द्विशक्ति, क्रमिक मिक मिकभेद-
सर्वज्ञता तृप्त्यनादि बोध स्वतन्त्रतालुप्तशक्ति अनन्त-
-शक्ति सहज सच्चिदानन्द शिवादि शिव गुण रूपेण ।
पुनरत एव निर्वाच्यत्व वागतीतत्व निर्मलत्वमनो-
-तीतत्व निर्गुणत्व गुणातीतत्व निर्विशेषत्व निर्विशि-
-ष्टत्व निष्प्रमेयत्व निष्प्रमाणत्व प्रमाणातीतत्व निर्द्व-

Center for Shaiva Studies, Pondicherry Collection

-रूपस्य निर्लक्षणस्य लक्षणातीतस्य किमपि किंचि-
द्वियनिर्वचनीयस्य निर्वचन निर्वाहकेण पुनस्तावा-
भोग्यतया दृश्यप्र-पञ्च दृगपि यदृश्यादृश्यवे सादृश्य
स्फुरणोपस्फुरणस्फुरितैक भाति संदित सादृश्य सम्बन्ध-
स्फुरणोपस्फुरण स्फुरित स्व सदृग्दृगन्तर दृगपि सत्
पुनस्तादृक् स्वदृगपि सत्पदार्थ सर्वार्थ दृक्कार्य प्रपञ्च-
सर्वार्थदृगपि सत्तात्मानं पृथक् पृथक् स्थितैक-
सद्भावनद्वैतैक चित्वात्मना स्वरूप लक्षणेन शिव-
-त्वेन केनचिदुपहितेन च सुलक्षित तत्सात्मवर्णं
शिवं स्वं च स्वलक्षणेतर वस्तु व्यावृत्तं यथा तथा
सिद्ध शिवयोगी साधक शिवयोगी च क्रामिकम्
साक्षात्पश्यति। पुनस्साक्षात्वार्थ ध्यानार्थं यत्वा-
-नुष्ठानमिति व्यवहित ज्ञानाति पुनस्साक्षाद्दिव
ध्यायति समाधत्ते च पुनः कथमुच्यते। हिति
त्वमात्रं स्वन्य प्रासादोल्लिखित निरुद्ध हंस मन्त्र -मध्य- बीज-
बिन्द्वात्म स्वन्य कुम्भक सुतिम केवल कुम्भक कृत
ध्यानोद्भूति मदुन्मनान्यन्तो हृदि षोडश कलाद्य प्रासा-
-दोन्मनी शिरोन्तस्थ निरुद्ध हंस मन्त्र मध्य बीज
बिन्द्वात्मक केवल कुम्भक कृत ध्यानोद्भूति मदुन्मन्या-
न्तो द्वादशान्ते वा तत्स्थं लक्षण निर्मुक्तेः। क्षुतिप-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

प्रासादिवत् किमपि किंचिदिति स्फुरणोपस्फुरण-
143. b. स्फुरित परइति पठित परशिवमात्र परार्थ स्वार्थ-
विषय विजृम्भणतया परसंवित्स्वसंविदुन्मिष-
त्तन निर्भासरूपतया शिथिलीकृतिवत् शिथिलिमाच-
-या किंचिदुल्लसद्ध ज्ञानक्रियात्मकस्यात्मोत्कर्षवपु-
-ष्मत्तया निर्विषयवदुज्ज्वलहर्षोपचरित तया चोप-
-लक्षित किंचिदुल्लसद्ध क्रियाज्ञानात्मक समाधिपूर्वाभ्यां
स्वगतस्त किंचिदुद्यमित्युल्लसत्स्फुरिततर व्यावर्तकावं
पद लक्ष्यार्थ चिन्मात्रात्म स्वभावात् तदुपलक्षित
शिवपदलक्ष्यार्थपरो परि परिस्तीर्णोऽसि पदलक्ष्यार्थ
-परोपरि परिस्तीर्णोऽसि पदलक्ष्यार्थ शिवात्म शिवभूत-
-स्तद्रूप शिव इति । स्वगतस्त किंचिदुल्लसदित्यन्तस्फुरिततर-
व्यावर्तकाहं पद लक्ष्यार्थ चिन्मात्रात्म स्वभावात् तदु-
पलक्षित शिवपदलक्ष्यार्थ परोपरि परिस्तीर्णोऽसि पद-
लक्ष्यार्थ स्वात्म शिवभूत स्तद्रूप शिव इति च समुद्दि-
-ष्टयुग्म सर्वेश स्फुरणरूपाभ्यां भावव्युत्पत्तिकार्थ क्रिया-
-रूप हीप प्रकाशवदपृथग्विशेषक घोपलक्षिताभ्यां
प्राक्प्रोक्त रीते: परसंवित्स्व संविदुन्मिषत्ताभ्यां
साक्षात्काराभ्यां जड चेतनतर सर्वाशेषस्य तद्रूप-
शिव एवं साक्षात्प्रभवति । पुनस्तत्साक्षात्कार्थ स्वात्मा-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-र्थं ज्ञात्वानुष्ठानमिति व्यवहितत्वं जानाति। पुनस्सा-
-क्षाद्विज्ञायाति समाधत्ते च पुनः कथमुच्यते। आत्मा
परश्शिवश्चेति त्रिपदार्थास्त्रिचेतनाः ।
त्रिशरीरोदय सविभज्ञानान्वाशुसीति समभवाः ॥
बिन्दुर्नादश्च शान्तिश्च पारश्चैव परात्परम् ।
बह्मव्याप्यवसाथिश्चैव आत्मानन्द सुखं भवेत् ॥
परात्मानन्द संप्राप्ति स्वप्रकाशन क्रियते (मुच्यते) ।
भिन्ने देहे शिवोभूत्वा शिवधर्मसमन्वितः ॥
शिवानन्दमनुप्राप्य त्वविभागाय कल्प्यत इति ।
श्रीज्ञान सिद्धि चिन्त्य विश्व रौरव श्रुतेः। स्वकीयात्मा-
-नन्द परानन्द शिवानन्दानुभवं यथा तथा परकीया-
-त्मानन्द परानन्द शिवानन्द समूहं यथा तथा साक्षात्
-पश्यति। तत्साक्षाद्वार्थं ज्ञानार्थं ज्ञात्वानुष्ठानमिति
व्यवहितत्वं जानाति। साक्षाद्विज्ञायाति समाधत्ते च।
पुनः शिववर्ग सहितानादि मुक्त शिवो ज्ञान योग विविक्ता-
-नभिव्यक्त शिव कथंचिज्जीव मुक्तिमान् जीववर्गो
वा शिवान्तरवर्गं जीवान्तरवर्गं स्वात्मानं च क्रमिकं
तथात्वेन स्वस्वरूपलक्षणेन यथा कथञ्चित्वेन केन
-चिदुपाहितेन तेन स्व निरपेक्ष शक्ति सापेक्ष शक्ति भूत-
प्रत्यक्षानुमानागमैक द्विप्रमाण क्रमिकं साक्षात्पश्यति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदर्थं व्यवहितं जानाति साक्षादिव ध्यायति समा-
-धौ च । तावदेतदुक्तम् पौष्करकामिकादिके
तावत् प्रमाणोदाहरणम् । पतिज्ञानैकगम्ये च
पतिस्तद्धेतुरेव च । शिवप्रकाशकं ज्ञानं शिवज्ञानं
परं स्मृतम् ॥ वेदाद्यपरविज्ञानम् पशुपाशार्थदर्शकम् ।
यथा विलक्षणञ्चक्षुः क्षपायाञ्च विलाळयोः ॥
तथा विलक्षणञ्चैव ज्ञानमेतत्परापरम् ।
144.a कामिकादि शिवज्ञानं वेदार्थज्ञानमेव च ॥
समं यो मन्यते मोहात्तं प्रयत्नेन वर्जयेत् ।
पूर्वोत्तरविरोधेन सोऽत्रार्थोऽभिमतो भवेत् ॥
इत्याद्युक्तवं तर्कं शुष्कतर्कं विवर्जयेत् ।
तस्मादागमयुक्त्यैव सूक्ष्मार्थप्रविचारणम् ॥
कर्तव्यं नानुमानेन केवलेन विपश्चिता ।
विवादाध्यासितं विश्वं विश्वविकर्तृपूर्वकम् ॥
कार्यत्वादावयोस्सिद्धं कार्यं कुम्भादिकं यथा ।
हेतूपदेशगम्यं यत्तत्परोक्षं प्रचक्षते ॥
अपरोक्षं पुनस्तेषादनुष्ठानात् भविष्यति ।
परोक्षमस्थिरं प्राहुरपरोक्षन्तु सुस्थितम् ॥
ध्यानिनां हि परं पुंसां भवेत्प्रत्यक्षमैश्वरम् ।
ज्ञानाद्ध्यानं भवेद्ध्यानात् ज्ञानं भूयः प्रवर्तते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवस्य दर्शनं ज्ञानं योगस्तत्रैकचित्तता ।
सर्वार्थभासकं ज्ञानं शिवयोगस्तु शाश्वतम् ॥
प्रकाशयति सूक्ष्मार्थं सूक्ष्मसूक्ष्मणामयं शिवः ।
ज्ञानं परोक्षध्यानं च साक्षात्कारः क्रमात् भवेत् ॥
अनुभूतौ प्रमाणानाम् परिनिष्ठा समाप्यते ।
स्वतस्तथैव या ज्ञप्तिः किन्तया बहुभिः प्रमान्तरैः ॥
अतीन्द्रियं च वस्तु तद्ग्राह्यानुभवेन किम् ।
अनुभवोपि मनोध्यक्षः प्रसिद्धः क्षुधया तृट् ॥
देवी. सालक्ष्ये हि अनित्यत्वं निरालक्ष्येति रूपता ।
पक्षद्वयेपि दोषोस्ति कथं ध्यायन्ति योगिनः ॥
ईश्वरः । यथा शिशुरकिंचिज्ञो मूढोप्युत्थान शायितः ।
परतत्त्वमजानन्तः पुरुषा बालकोपमाः ॥
अज्ञायमाने सत् ज्ञेयं ज्ञाते सत् ज्ञेयमिष्यते ।
ज्ञेयोद्भवं च विज्ञानं विज्ञानन्तात्प्रकाशकम् ॥
ज्ञातेनैव तु तत्तुल्य प्राप्तिस्तत्र न संशयः ।
अनाख्येयस्य तत्त्वस्य निर्गुणस्य यशस्विनी ॥
गुणवत् ग्रहणं कृत्वा कथये परमेश्वरम् ।
न योगं करणं चात्र आधारालम्बनन्न च ॥
हृद्यं च नासिकाग्रस्य वीक्षणञ्च विलम्बनम् ।
किंचिदाभासमात्रन्तु कृत्वा तु कथये द्विजम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निस्तत्त्वे निर्म्मलीभूते निर्विकल्पं प्रकल्पयेत् ।
शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ॥
शिवं शक्त्यादिभिस्सार्धं पश्यत्यात्मा गतावृतिः ।
आद्यन्तशून्यममलं परिपूर्णमेकम्
सूक्ष्मं परापरमनामयमप्रमेयम् ।
भावैकगम्यमजडं शिवतत्त्वमाहु-
श्चिच्छक्तिसंस्फुरणरूपमहात्मलिङ्गम् ॥
गलिते सर्वथा बन्धे विमुक्ते चाणवे मले ।
सर्वार्थद्योतिनाशक्तिः शिवस्यैव विजृम्भते ॥
परसंवित्स्वरूपायाश्शक्तेस्सति बन्धने ।
परमात्रं प्रकाशेत मुक्ताणूनामनारतम् ॥
ततो विमुक्तास्सर्वज्ञा ननु चिन्मात्रवेदिनः ।
सति बाह्ये तद्ज्ञानम् वस्तुनिष्ठा तमस्फुतम् ॥
तमसाच्छाद्यमाना हि न ते मुक्ताः कदाचन ।
शिवप्रमाणम् । नाध्यक्षस्यापि तल्लिङ्गं वनशाखमपि
शाङ्करम् । ज्ञानमाभाति विमलं सर्वज्ञ सर्ववस्तुविति ॥
ब्रह्मणो ग्रहणम् । सत्कर्म्मणि संजाते कालान्तर-
मृ. ८ वशात्तथा । तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यथा ॥
सर्वज्ञस्सशिवो भूत्वा किञ्चिज्ज्ञत्वविवर्जितः ।
शिवत्वं याति सम्पूर्णस्संसारी न पुनस्ततः ॥

Center for Shaiva Studies, Pondicherry Collection

सर्वज्ञाद्यं शिवैश्वर्यं लब्ध्वा स्वात्मनि राजते ।
तत्सायुज्यमिति प्राहुर्वेदागमपरायणाः ॥
सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विराजमाना विरुद्धदेहस्य शिवत्वमेति ॥
तत्र शुक्तौ यसौ तैल न सन्ति गुणीकृतः ।
यावत्तावद्वृथा तस्य तत्त्वव्याहितेर्यथा विभुः ॥
साम्राज्याधिवासे प्युक्ते नृपसूनोः कृतार्थता ।
न तादृग्वानभिज्ञस्य गतस्यापि न राजते ॥
स्वगुणव्यक्तये तेन सर्वेण व्याहृतीश्च षट् ।
होमयेद्दीक्षितो धीमान् प्रयोगेणामुना यथा ॥
सर्वज्ञो नित्यसमयो धस्वतन्त्रस्तृप्तिमान् भव ।
अलुप्तानन्तशक्तिस्त्वम् इत्थ प्रासादपूर्वकम् ॥
आत्मनीति पदोपेतं स्वाहान्तं होम सम्युतम् ।
अपृथक् भूतमात्मानं तत्समानगुणं स्मरन् ॥
नरभावमाच्युतिका यावत्तावज्ञानदृशा गुरुः ।
अयमात्मा शिवत्वार्ह शिथिलीकृतबन्धनः ॥
पतिशक्त्याहितेनायं पाशप्रान्तश्च सङ्कुशः ।
तद्वत्तु ताम्रसंस्थानं स्वगुणोदय योग्यकम् ॥
स्पर्शविधमाणि प्रस्तव्यश्चोदितो हं च शम्भुना ।
संस्पर्शाद्विमलीकृत्य कलधौतमिवाचिरात् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

करोति गुणसंपन्नम् सतां मस्तकभूषणम् ।
मायाकर्ममलैर्बीज रोधशक्त्याह्वयैर्मलैः ॥
पक्वैस्तु पञ्चभिश्शक्तभुक्तक्या दीक्षा गुरुस्सरम् ।
विमोचितो भवेत्सर्वं सर्वज्ञो नादिबोधयुक् ॥
सर्वकर्ता महानित्यं तृप्तो व्याप्तस्सकर्मधृक् ।
अलुप्तानन्तशक्तिश्च स्वेच्छाज्ञानक्रियामलः ॥
स्वानन्य प्रकाशविज्ञप्तिस्सच्चिदानन्दलक्षणः ।
शिवस्य ये गुणास्तेषां समस्तास्सन्ति ते गुणाः ॥
चिदानन्दमनुप्राप्य शिवैकरसतां व्रजेत् ।
क्षीरे क्षीरमिवाभिन्नं विभिन्नं दृष्टिदृष्टवत् ॥
शिवात्मनोस्सामरस्यं व्यज्यते गुणसाम्यतः ।
अपयाते मले तस्मिन्सर्वत्रोदितदृक्क्रियः ॥
निरातङ्कं निराबाधं शिवत्वमधिगच्छति ।
शिवस्समानजातीयो ह्यात्मनस्सस लक्षणः ॥
शिवलक्षणं। देवी प्राह। सर्वज्ञादि गुणा देव गीयन्ते
सर्वतश्शिवे। तानहं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ॥
ईश्वरः प्राह। पशुपाशांस्तथा तत्वान्युद्भवं प्रलयन्तथा ।
सर्वं जानाति देवेशि सर्वज्ञस्तेन चोच्यते ॥
सर्वैश्वर्य सुसंपूर्णस्सर्वाश्रय निराश्रयः ।
सर्वतः परिपूर्णश्च परितृप्तस्स उच्यते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनादित्वात् स्वभावाच्च सर्वात्मा गुह्यगोचरः ।
स्वशक्त्या बोधयेद्यस्मात्तस्मात् बोधः प्रकीर्तितः ॥
उत्पादयेज्जगत्कृत्स्नं त्रैलोक्यं सचराचरम् ।
स्थितिं नाशं च देवेशि स्वतन्त्रस्तेन चोच्यते ॥
नित्यत्वादजनित्वाच्च सर्वकर्त्वाच्च शङ्करः ।
योगैरव्याहतत्वाच्च अलुप्तस्तेन चोच्यते ॥
145. a. अनादिमध्यनिधनो न परो नेति कश्चन ।
शक्तेरव्याहतत्वाच्च अनन्तस्तेन चोच्यते ॥
एते ह्यङ्गा महेशस्य वेदितव्याः प्रयत्नतः ।
मुच्यते सर्वपापेभ्यः शिवं याति निरामयमिति ॥

ततो नेति नेति कृत नियति मात्रलब्ध निर्विषयत्वं कि-
मपि किंचिदिति मात्रं वा समाधिरित्युक्तनिरस्तनि-
-ष्फलत्वात् । ततो मुक्तशिवाश्च निरतिशय सुखरस-
परिपूर्ति तृप्ति समृद्धयमृत सन्तोषा द्वादि पदपाकिनां
शिवानन्दाब्धौ यथा स्वं पृथक् पृथविस्थितां शिव-
भोग भाजनीं शिवत्वाभिव्यक्तिमनुभवन्ति मोदन्ते ।
तदुक्तं कामिकादिषु :- यदानुगृह्यते सोऽयं गुरुणा करुणा
दृशा । तदास्य पुद्गलस्यैषा आदिशक्तिः प्रसर्पति ॥
देशकालाननवच्छिन्ना निरवद्या निरञ्जना ।
तद्विलक्षणमात्मानं ज्ञात्वा च परिहृष्यति ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निजानन्द महाम्बोधौ यथा मज्जेदनाकुलः ।
सा मुक्तिस्सत्तु निर्वाणस्तदेव परमं पदम् ॥
मृग्यं हि ऋषिभिस्सर्वैर्योगिभिश्च द्विजोत्तमाः ।
त्रिमलापगमे व्यक्तं शिवसाम्यस्य लक्षणम् ॥
आत्मरूपं चिदानन्दमयं सायुज्यनामकम् ।

इत्थं स्तुतार्चनाद्यैः शिवयजनविधिर्निर्दिष्टः भूयः करोति
शङ्कायुक्तस्त्रिलोकीकथासुखवरस्याहितं स्वामितोऽर्थोऽतिकाशः।
शास्त्रत्वेन यथावद्विनयपदमखिलोत्पत्तिसंहारहेतुम् ·
ज्ञानानन्दस्वभावो दृढतरमलमायादिबन्धैर्विमुक्तः ॥
नात्मद्वैतापवर्गो नच परशिवयोरैक्यमात्रापवर्गो
नाविद्याध्यासहानिर्नच गुणविलयो नापि पाषाणमुक्तिः।
यत्बोधानन्दरूपं त्रिमलविगमने व्यक्तमात्मस्वरूप-
न्तत्सायुज्येन नित्यं शिवसदृशविभुरेव तन्त्रे पवर्गः ॥

तत्र स्वेतरशिवशिवत्वाभिव्यक्त्यात्मकम् स्वेतरशिव
शिवानन्दं संसार्यात्म चिदभिव्यक्त्यात्मक जीवानन्द-
मिव सत्तामात्रं समुपपद्यते नानुभवन्ति संसार्यात्म-
सुखदुःखरूपजीवानन्दानुभवप्रसङ्गात् । शिवोऽपि
स्वशिवानन्दमेवानुभवति तस्यान्यथात्वे तथात्व
प्रसङ्गात् । तदुक्तं कामिके -: सहजानन्दसन्दोह स्व-
संविल्लक्षणात्मक। परसंवित्स्वरूपिण्या शक्त्या परमयायुतेति।

Center for Shaiva Studies, Pondicherry Collection

ततश्चानादिमुक्तशिवानन्दमादिमुक्तशिवाश्चा-
नुभवन्तीति वदन्तः केचिदाधुनिकाः शैवाः परा-
जिताः पलायिता भवन्ति । ततश्च पुनः पर्यवसि-
तविवाद याथार्थ्यकृत शिवसिद्धान्तशैवैः सर्वविद्या-
सरित्पतिभिः श्रीमत्सद्योज्योति बृहस्पति श्रीकण्ठ-
रामकण्ठ नारायणकण्ठ भोजराज अघोरशिव रामनाथ
प्रमुखगुरूत्तमैः कृतेष्वनवद्यग्रन्थेषु प्रकरणादि-
केषु श्रीमद्रौरव स्वायम्भुव सर्वज्ञानोत्तर पौष्कर-
मतङ्ग किरण मृगेन्द्र प्रकरण व्याख्यानादिकेषु च
आनखान्नकेशाग्रमनवद्याङ्गीं व्याभाति सौन्दर्य-
लावण्यायां स्वदृश्यायां कामिन्यां प्रणश्लेष्मादिकं
नाक्षिकैव शुष्कतार्किकमार्गेण दूषणं मार्गयमाणाः
पुनश्शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ।
शिवं शक्त्यादिभिस्सार्धम् पश्यत्यात्मा गतावृतिरिति
निश्वासकारिकाग्रन्थे गतावृतिस्समर्थीकृतचिद्दृशे-
145. b. त्यत्र दिदृक्षयाकृष्टौ सापेक्षत्वमस्त्यन्यथा पुनरविके-
कोऽपश्यादिति वदन्तः पुत्रश्च दशभिस्सार्धं भारं वहति
गर्दभीत्यत्र मीमांसान्यायेन भारवहनं गर्दभीमात्रस्ये-
व शिवं शक्त्यादिभिस्सार्धमित्यत्रापि शिवस्यैव
मात्रमिति कथयन्तः पुनः पशून् पाशांश्च मुकाणून्

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पातीति पतिरुच्यते । इति क्वचित् ग्रन्थे मुक्तान्पुन
पातीति श्रुतेः। मुक्तात्मनां पाशत्रयरहित शिवप्रेर्यत्वं
गतं स्वतस्साक्षाच्छिवप्रेर्यत्वं किंचिदस्तीति भ्रमन्तो
मुक्ताः कर्तृत्वेऽपि प्रेर्यो भवत न वादिमत मुद्धृत्य मुप-
क्रामन्तो मतावृतिरसमर्थीकृत चिदृगित्यत्र पाशमुक्त-
शिवत्वाभिव्यक्ति फलदृगाख्य मुक्तिमजानन्तः पुनर्गर्दभी-
भारवहन मात्रमिव शिवदर्शन मात्र मित्यत्र सार्थ-
मित्यस्य कर्तृकर्म गतान्वय वैलक्षण्यं सूर्यप्रकाशा-
भिव्यक्त दृष्ट सूर्य सार्थ तत्प्रकाशादिक चक्षुषा
वैकालिकत्वं च विस्मरन्तः पुनर्नष्टेनावृत वीर्य-
स्य सोत द्रावा विमोक्षणादिति मृगेन्द्रोक्ति मवि चार-
यन्तः मुक्तान्पुन पातीत्यत्रापि मोक्तुं योग्यान् परि-
पक्वमलान् दीक्षितान् दीक्षितकृत ध्यान समाधि-
जीवन्मुक्ति शिवसाक्षात्कारान् जीवन्मुक्तान् पुन
रपरमुक्तान् पातीत्यर्थमबुध्यन्तः मुक्तावृक्का-
स्तादीयाः केचिदधुना विद्यमानशैवाश्च प्रतिष्ठि-
ताः। श्रीमद्द्राविड गुरुवरकृत शिवज्ञानसिद्धि
प्रमुखग्रन्थानपद्यापि स्वात्म शिवात्यन्ताद्वैत-
स्वात्म शिव शुद्धाद्वैत शिवात्म शिवजाति विशि-
ष्टाद्वैत शिवात्म शिवविशिष्टाद्वैतात्म सर्वथा शिव-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सामरस्य मोक्ष साक्षात्कार प्रतिपादकान्यपि क्वचित्
क्वचित् शिवात्म शिवव्यतिरेकाद्वैत विवक्षित शिव
विशिष्टाद्वैत विषय समाभ्युत्कर्ष प्रतिपादकानि
न हि परमार्थतः शिवात्म शिवाद्वैतं पतन्ति। तदुक्तं
यजुर्वेदार्थ तात्पर्ये -

अद्वैतनाम शिवैक्यरूपासनाया -
मुक्तत्वेति परमार्थतया न वाच्यम् ।
भेदस्फुटे नाकडमात्मिकयोरथैकम्
तादात्म्य भावनतयापि विदं प्रमार्थीति ॥

ततश्च पुनर्विरालम्ब शिवयोगि मार्गवर्ति कृत-
शिव साक्षात्कार जीवन्मुक्त शिवादि मुक्त शिवानादि मुक्त-
शिवैस्सह यथा स्वं संबन्धितया मन्योन्यं शिवादि-
मुक्त शिवादि चिदचित्प्रमेय प्रमेय स्वतः प्रमेय पर-
:र्थ विषय विवक्षया कृत करण कर्तृ द्विव्युत्पत्तिक-
क्रमिक भावमात्र करण कर्तृ द्विरूप क्रमेण परसंवि-
-दिति स्वसंविदिति च द्विरूप शिवत्व द्विरूपैक-
रूपाणां पुनर्यथा स्वं परसंविदेक पदार्थ चिदप्रमे-
य प्रमेय मात्र स्वार्थ विषय विवक्षया कृत करण-
कर्तृ कर्तृ द्विव्युत्पत्तिक क्रमिक भाव मात्र करण कर्तृ-
द्विरूप क्रमेण स्वसंविदि परसंवित् स्वसंविदन्तर-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-त्मा विशेषचिद्विति च द्विरूपाशिवत्व द्विरूपैक-
-रूपाणां पुनरस्याति क्रमात्तत्त्व भोगाधिकार त्रितय-
146.a -स्थान रूपकाध्वय भूत वृत्तौ प्राकृत वैकृत सर्वोन्मनातीते
शाक्त मन्त्र समुपात्रे वस्तु मात्राति लालसेति श्रीम-
-न्मतङ्ग श्रुतिसिद्ध शिवाकाशात्म शक्ति, पाते स्फुट शिवे-
-तत् स्वशक्ति सहज समुत्थाया स्वप्रयोजन पर प्रयो-
-जन जिज्ञासा विधुरतया सत्तामात्रेण तावद्विभावि
त्वमहमिदं त्वमहं पुनरिदमनिदमहं चितोः क्रमेण
विसदृश सदृशानि कुतिपासाविशत् कान्यपि कानिचि-
-द्विश्वोपस्फुरणस्फुरितानि त्वमन्तराणि त्वमहं पुनरिद-
-मनिदमहंचितोः क्रमेण, विसदृश सदृशं किमपि किंचि-
-द्विश्वोपस्फुरणस्फुरित त्वमन्तर त्वमहमित्याद्यर्थ प्रत्यर्थ-
परार्थ स्वार्थार्थ विषय विवक्षित परामर्शाभासन प्रत्यक्-
-प्रतिभासनात्ताति सूक्ष्म वस्तु मात्राति लालसा कस्फुट
शैवशाक्त बोध गर्वा तिलकाया बाह्य योग्यता सापेक्षा-
प्रकाशानस्तत्त्वर्णी स्थित बाह्यवत् कार्ययोग्यता सा-
-पेक्षा स्वानन्त स्तूर्णीं स्थित परार्थ स्वार्थ विषय विवक्षित-
द्विक द्विक क्रमिकानाहत शैवशाक्तोन्तरत्रिक विस्फारणीय
पर प्रयोजन जिज्ञासा धुरन्धर निर्याति नियमन बोधगर्व-
क्रिया संरम्भ सङ्कल्पावधान तादात्म्य भूमि भूताया-

Center for Shaiva Studies, Pondicherry Collection

बोधगर्भ क्रमिक शक्ति विद्या कला नादिकाख्या ज्ञानार्थ
क्रियायाः स्मृति परिणति विवर्तारम्भ वैधुर्येण निरन्तर-
सहज नित्य वस्तु मात्र विषय विषयी कृत लक्षण समु-
द्देक हेतुत्वमात्रेण कृत क्रियाशक्त्युद्धा शक्ति, भिन्नत्वा-
विवक्षित शाक्तस्वरूप विद्याकला भूत ज्ञानशक्ति संज्ञि-
.तानां पुनरतिक्रान्त बिन्दुकलये तथाभूत परा शक्ति पति-
भूते शान्त्यतीतं परतत्त्वमविनाश्य व्याप्यात्मकम् ।
ते नोन्मीलित सद्भावाः पाशव शिवत्वं गता इति श्री-
मन्मतङ्ग श्रुते शिवत्वाभिव्यक्ति, मात्रानुग्रह कृत्य-
कर्तरि तत्र परबिन्दुभूते, परशिवे पुनरतिक्रान्तबिन्दु-
कलये महामायात्म परनादात्मके तथा भूत नादात्म-
स्वान्तस्थ परबिन्दुरूप पराशक्ति पतिभूते पाशमुक्ति
मात्रानुग्रह स्थूल पञ्चकृत्य योग्यतावृत्ति लक्षण पाल-
.नात्म सूक्ष्म पञ्चकृत्य कर्तरि तावन्मुक्ति, कर्तृत्वमात्रेण
लये यद्यपि शान्तात्म स्वात्मके तत्र शान्त्यतीतासि द्युते
परशिवे च तावत्तस्य शक्ति सहज समुत्थाया यथार्ह
सूक्ष्म पञ्चकृत्य विषये सम्युक्त नियति नियमनाधि-
तादात्म्य भूमि भूतायाः प्राक्प्रोक्त ज्ञानार्थ क्रियायाः
प्राक्प्रोक्तवद्धेतुत्वमात्रेण तथा विवक्षित तथा भूत-
ज्ञान शक्ति संज्ञितानां लयाख्य परशिवो पान्तस्थे

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

श्रीमारम्भे क्षुब्धकार्यलयस्थानमात्रविवक्षित पर-
-बिन्दुमध्यस्थ परनादात्म परशिवात्म स्वात्मके
चतुर्मूर्तिमयं शुभ्रं यत्तत् सकलनिष्कलमित्युक्त
परबिन्दुरूपानाहतशक्तिपतिभूते स्थूलपञ्चकृत्यो-
-द्योग कर्तर्यनाहत शिवे तत् स्वशक्ति सहज समुत्थाया
इमानीत्थमिमानि नेत्थं भवेयुरहमिच्छामि पुनरिदमि-
146.b. -त्थमिदं नेत्थं भवेदहमिच्छामीत्याद्यर्थ प्रत्यर्थ परार्थ-
स्वार्थार्थ विषयविवक्षित परानुप्रवेशरूप नियम
नियमनात्मिका या इच्छार्थ क्रियायाः वृत्तिपरिणति-
-वितारंभ वैधुर्येण प्राकृत् (कृ) प्रोक्त समुद्रैकहेतुत्व मात्रेण
कृतज्ञानशक्ति क्रियाशक्ति भिन्नत्व विवक्षित ज्ञानाकारवण्ड-
रागभूतेच्छाशक्ति संज्ञितानां लयाधिकारमध्यस्थे प्रो-
-क्तेतादृश्यनाहत शिवे तत्स्वशक्ति सहज समुत्थायाः
पुनरिमान्येतैस्सह संयोज्य केवलानि वा कार्याणि
द्वयानि वा पुनरिमानि कारणानीमानि करणानी-
मानि प्रयोजनान्यहमाज्ञापये पुनरिदमनेन सं-
-योज्य केवलं वा कार्यमस्मै पुरुषायाहमनेन साधने-
-न तावद्दिव्यन्तं कालमयेदं फलमनेन फलान्तरेण सह
पृथग्वा देयं कारणमिदं करणमिदं प्रयोजनमिदं अहं
जानामीत्याद्यर्थ प्रत्यर्थ परार्थ स्वार्थार्थ विषयविव-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

क्षित पराग्रूप प्रत्यग्रूपशाक्त सविकल्प बोध गर्वालि-
कायाः बोधगर्व व्यामिश्र शाक्तबुद्ध्यहङ्कार तात्त्विकायाः
ज्ञानार्थ क्रियायाः वृत्तिपरिणाति विवर्तारम्भ वैधुर्येण
प्राक्प्रोक्त प्रकारतस्तत्सम्बुद्ध्येक हेतुत्वमात्रेण कृत-
क्रियाशक्तीच्छा शक्ति भिन्नत्व विवक्षित प्राक्प्रोक्त-
शाक्त विद्याकला व्यामिश्रास्पद शाक्त बुद्ध्यहंकारभूत-
ज्ञानशक्ति संज्ञितानां तदधिकार मूलोपात्तस्ये प्रोक्ते
तादृश्य नाहत शिवे तत्स्वशक्ति सहज समुत्थायाः
पुनरिमान्यधुना कार्याणि देवानि नानाविधान्यहं-
करोमीमानि इच्छामि वा पुनरिदमधुना कार्यत्वेयम्
वा तावदिदमहं करोमीदमहमिच्छामि वेत्याद्यर्थ प्रत्यर्थ-
परार्थ स्वार्थार्थ विषय विवक्षित पराग्रूप प्रत्यग्रूप क्रिया-
संरम्भात्मिकाया श्शाक्ताहंकारभूत क्रियाशक्ति संज्ञितानां
पुनरधिकारे व्याचिकीर्षत नाकिन सदाशिवेति नाम
शक्तिपति सदाशिवे तत्स्वशक्ति सहज समुत्थायाः पुन-
रिमान्येवं भूतानि भवन्तु देवानि स्थूलानीच्छामि
इच्छामि वा पुनरिदमेवं भूतं भवतु देयं स्यात्ताव-
दिदमहमिच्छामि इच्छामि वेत्यर्थ प्रत्यर्थ परार्थ स्वार्थार्थ
विषय विवक्षित पराग्रूप प्रत्यग्रूप शाक्तविकल्प संकल्प
संकल्पात्मिकाया श्शाक्त मानसतात्त्विकाया इच्छार्थ क्रिया-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आवृत्तिपरिणति विवर्तारम्भ वैधुर्येण प्राकृप्रोक्त-
प्रकारेण स्तत्सम्बन्धैक हेतुत्व योगेन ज्ञानशक्ति-
क्रियाशक्ति भिन्नत्व विवक्षित क्रिया ज्ञानत्वसम्भेद-
ज्ञान रागास्पद ज्ञान मनो बुद्ध्या शक्ति संज्ञितानाम्
पुनरधिकाराख्य सदाशिव वहिरूपानन्तस्थानात्स्थान-
-तिकालानलबिन्दुक परशिवानाहत निवृत्त्य, कला चतुष्क-
श्लो. ५. -ला शक्तिकाधिष्ठिताभिः शान्त्यतीता शान्ति विद्या-
प्रतिष्ठा निवृत्ति संज्ञिताभिः पञ्चभिः कलाभिरसंक्रम्य
-पञ्चसादाख्य पञ्चमूर्ति तदुभय संक्रान्ति समुत्पन्न-
पञ्चब्रह्म समुत्पादन मार्ग पराशक्त्यादि शक्ती इच्छाशक्ति-
ज्ञानशक्ति क्रियाशक्ति संज्ञितानाम् पुनरीशान्यादि -
-मूर्धान्त पञ्चब्रह्म शक्ति वामादि सर्वभूत दमन्यन्ताष्ट-
शक्ति मनोन्मन्यादि सरस्वत्यन्त पञ्चशक्ति मूलाना-
-मथापि पुनरनन्तशक्ति मूलानां शक्तीनां यथास्वं
सम्बन्धि दृष्टिरेद्युत्कानं ज्ञानं भावव्युत्पत्तिं भवति।

पुनस्तदेव ज्ञान निर्धूत ज्ञानद प्राकृत मानसिक बौद्ध-
-हंकारिक करण व्युत्पत्तिक ज्ञान नाम स्वप्रयोजन -
वृत्तौ पाशविधेयुक्ता बोधमार्ग क्रिया संरम्भ वहिस्थूल-
विकल्प सङ्कल्प सविकल्प ज्ञान क्रियावेदनात्; पर-
संवेदना स्वसंवेदनात्मानात्मरूप सविकल्प निर्विकल्प-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-ज्ञानतया पुनस्तदुन्मिषत् स्वमूलाग्रक्रमिकानु-
बिद्ध ज्ञातृरागीयमान सिब, परनियमस्वनियमपर-
बिकल्प सङ्कल्प स्वबिकल्प सङ्कल्पान्तरित शाक्तबौद्ध-
हंकारिक क्रमिक परार्थ स्वार्थ विषय बोध गर्व क्रिया
संरम्भ नैसर्गिक सबिकल्पज्ञानतया च निष्कलङ्कं
भवति । पुनस्तदेवज्ञानं पराग्रूपपरसंवित्परात्मता-
-त्मकं प्रत्यग्रूप स्वसंवित्प्रत्यक्परात्मकं च भूत्वा
प्राक् प्रोक्तरीतेर्दृश्य दर्शनतया दृग्भासनतया च
अहचिदन्तरार्थ प्रत्यर्थ चिद्दर्शमात्र स्वार्थग्रह विग्रहं
भवति । पुनस्तदेवज्ञानं स्वकार्यवैमुख्यलक्षण
निष्कलत्व लिङ्ग प्रकृतिभूत स्वकार्य निवृत्तिरिति
पुनः स्वकार्यवैमुख्य लक्षण निष्कल सकलत्वलिङ्ग-
प्रकृतिविकृतिभूत स्वकार्य निवृत्ति प्रवृत्तिरिति
पुनः स्वकार्य निष्पत्तिलक्षण सकलत्वलिङ्ग विकृति-
भूत स्वकार्य प्रवृत्तिरित्यपि प्रोक्त महामायामायाकृत-
-अस्पन्द क्रियारूप त्रिव्यापृतीनां त्रिधैकधावृत्त हेतुत्व
मात्रेण व्यवहृतास्पन्द क्रियालक्षण त्रिधैकधावृत्त-
व्यापृतिलीनान्तर्भेद बाहिर्भेद व्यपदेश भेदमात्रत्वात्
लयशिवादिध्यानादिषु क्रमिक विवक्षितं चन्द्रार्क-
कोटिद्युति निर्मलादर्शन प्रत्यक्षमानुत सागरभक्ति-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-त्यादि पुनर्ह्रीणाकृतिरित्यादि पुनः पञ्चवक्त्रस्त्रिपञ्च-
दृगित्यादि च तटस्थलक्षणमात्रमत्र विवक्षामात्रकृतं
विवर्तं कल्पितमिति वृत्ति परिणत विवर्तारम्भ-
वैधुर्येण स्वरूपलक्षणान्तःपातनीयतया नुलोम्येन
ज्ञानशक्ति भूत क्रियाशक्ति क्रमेण, कृत प्रवृत्त्यन्तं
प्रातिलोम्येन पुनरिच्छाशक्ति भूत क्रियाशक्ति क्रमेण-
निवृत्त्यन्तं यथा तथा ज्ञानशक्ति क्रियाशक्तीच्छाशक्त्य-
र्थ क्रियाभूत ज्ञानात्मनिवृत्ति क्रियात्म निवृत्ति प्रवृ-
-त्तीच्छात्म प्रवृत्तिरूपित रूपेषु तत एव सर्वभूतेषु
लय शिव भोग शिवाधिकार शिवेषु मध्यानुग शिवे-
तावन्तथा प्रभास्तव वृत्तिकृदुक्त्या युक्त्या च निर्वि-
47. 6 -कल्पक ज्ञानात्मकं भवति । ननु निर्विकल्पार्थ बोधे-
-पि भेदात्मा प्रत्ययस्थितः । अन्वयोत्तर विज्ञानं व्या-
-वृत्तरूपमागत इति पौष्करश्रुतेस्तथा रत्नत्रय श्रुतेश्च
लय शिव भोग शिवाधिकार शिवावस्थोत्तीर्ण स्वमध्य
-वृत निर्वाङ्क नष्टरुद्ध शिवे स्वप्रयोजनं प्रत्यालोकनं
विना स्वं प्रतिवस्तु स्वरूपमात्रेण तावदर्थ प्रत्यर्थ-
परार्थ स्वार्थार्थ वेदनामात्र वेदनात्मक निर्विकल्पक,
ज्ञानान्तरमिष्यत इति सूक्ष्म प्रत्यर्थ वेदनात्मक ज्ञान-
सविकल्पकज्ञानमस्तीति च पुनरतिक्रान्त बिन्दु-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कलयशिवेपि कथञ्चित्तद्नन्तरान्तर तदनीरवद्यनिर्वि-
विकल्पकज्ञानानन्तरविशेषस्तादृश परप्रयोजनपात्र-
शिवत्वाभिव्यक्तिमात्रानुग्रहकृत्यविषय सविकल्प-
ज्ञानञ्चास्तीति चे पुनरति श्रीमन् बिन्दुकलयशि-
वेपि प्रळयेप्यनुगृह्णाति सृजत्यवति हन्ति च।
तिरोदधाति भगवान् स्वापेक्ष्येण मालिश्यतिरिति ॥
श्री पौष्कर श्रुतेः। स्वापेक्ष्यास्तो बोद्धव्यबोधयोग्या-
क्रोद्दया अनुबधन् पान्थवत् कर्मिकर्म। मायाशक्तेः
व्यक्तियोग्याः प्रकुर्वन् पश्यत्सर्वं यथावस्तुजात-
मिति मृगेन्द्र श्रुतेश्च। मायाशक्ति व्यक्तियोग्यता-
कृत्यादि रूप सृष्ट्यादि पञ्चक पाशमुक्ति मात्रानुग्रह-
कृत्यान्तर सविशेष सूक्ष्म पञ्चकृत्य कृते स्तदनन्तरं तद्-
हे तथा भूत विषय सङ्कल्प मात्रस्य शाक्तबोधगर्भक्रि-
या संरम्भात्म सविकल्पकज्ञानञ्चास्तीति चे कथं
कथंचित् स्वान्तरङ्ग विकासवत् भोगाधिकार शिवात्म
विलय शिवे तदेव ज्ञानं निर्विकल्पक ज्ञानात्मकं
भवतीत्युक्तम्। सत्यम्। सर्वथा सङ्कृद्धाधिकार शिव-
सङ्कल्पकरणीयस्थूल पञ्चकृत्य विषयोद्योग मूलो-
द्रेकात्म बोध गर्भ क्रिया संरम्भात्मक ज्ञान सविक-
ल्पकज्ञानं प्रति निर्विकल्प ज्ञानात्मकं भवतीति न

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कोऽपि विशेषः। तदित्थं शास्त्र सविकल्पक ज्ञान-
पात्रीभूत भोगशिवस्य प्रोक्तवदधिकारशिवबहि-
-रङ्गत्वात् भोगाधिकारशिवयोस्तथा तत्पुनस्तत्र
वृत्तिकुण्डल्या कृत्वा च तदेवानां प्रोक्तविसङ्कल्पा-
-त्मकं सन्निर्विकल्पक सविकल्पक संकरो भयात्म-
-कन्तदुभयात्मकत्वदुभयात्मनिषक तदुभयात्मसङ्कल्पक-
-सर्वथास्थं बोधगर्भक्रियासंरम्भात्मकं सत्सविकल्प-
-कज्ञानात्मकं च भवति। पुनरेतदेव ज्ञान सकाल-
-चक्रावच्छेद्य नाम जाति गुण क्रिया पञ्चकार्थ प्रापर्य-
परार्थ स्वार्थार्थ युगपत्स्फुरण ग्रहणविमर्शं च्छेद्या-
-दिषु यथार्हं ज्ञानादि योजनाविहीनात्मकं सन्नि-
-र्विकल्पकज्ञानात्मकमपि कारणकार्ययोग्यता-
सापेक्षं सत् समुद्रितं स्वार्थार्थ निश्चयार्थत्वाथा-
योजनात्मकमन्यथापि परार्थत्वत्कार्य निष्पत्त्यर्थम्
कश्चिच्चकारणकार्यात्मवस्तु प्रभृतिषु यथार्हं इदं कार-
-णमिदं करणमित्यादि नामादि चतुष्टय सूक्ष्म योज-
-नात्मकं सङ्कल्पकमपि सविकल्पकज्ञानात्मकं भवति।
पुनरित्थं भूतमपि वैकल्पशाब्द प्राकृत बौद्धाहंका-
148. a. -रिकवृत्त्यौपाधिक नामादि चतुष्टय योजनाकृतपीनत्व
विहीनत्वमात्रेण निर्विकल्पात्मकमेव भवति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ननु मृगेन्द्रे —: नाध्यक्षेणापि तद्वृङ्ज्ञानशक्त्यपि
शाङ्करम्। ज्ञानमाभाति विमलं सर्वदा सर्वगस्तुवि-
-ति शिवज्ञानलक्षणश्रुतेः। अथ मोक्षकारिकायाम्:
पाशाभिभाविकाशक्तिः विसद्धानां दृक्क्रियाभिधा ।
ज्ञेये कृत्ये च युगपत् भाविता नक्रमाद्विनेति ॥
मुक्तशिवात्मज्ञानलक्षणश्रुतेश्च अर्थ प्रत्यर्थज्ञान-
-कृति द्विरूप वेदनयोरत्वात नक्रन युगपत् भावित्वेन
सदा नूतस्थिर संकल्पत्वात् क्रमाक्रम समुत्पत्तेः
क्रमाद्युत्पत्तिशक्तिमहिति मृगेन्द्रश्रुते रनुलोम्येन
क्वाचित्काक्वाचित्काभ्यां क्रमयौगपद्याभ्यां कथं सूप-
-पत्तिः प्रातिलोम्येनापि तथा कथं प्रकृतोपपत्ति
स्यात्। सत्यम्। अनिर्वाहे समर्थोऽपि स्फोटङ्क्षमपे-
-क्षते। इति पौष्करश्रुते र्द्वाह्य प्रकाश्य योग्यता सापेक्षा-
-निरक्षकत्वं क्रियारूप दाह प्रकाशवत् ज्ञेय कार्यो-
-त्पत्ति प्रकृतयोग्यता सापेक्षो युक्त शिवशक्त्यर्थ क्रिया-
-रूप नियम निश्चय प्रवृत्त सङ्कल्पात्मज्ञानानां विकृ-
-ति विधुरत्व दृष्टक हेतुना तथा भूतौ सृष्टि प्रलयौ
स्यातां। तदिदं प्रागपि प्रपञ्चितम्। ननु
शिवमुक्त शिवशक्त्यो र्थ क्रियात्मनस्तथा भूतस्य
ज्ञानस्याविलुप्ततया सिद्धत्वेन साध्यताराहित्या-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न हि करणं सापेक्षत्वमिति तद्विकल्पयो स्वापेक्ष-
परापेक्षस्वरूप क्रमिक कर्तृकरण। द्विव्युत्पत्तिक,
भावव्युत्पत्तिक, ज्ञानार्थ क्रियाक, ज्ञातृज्ञान तथाभूत
नियमार्थ क्रियाक, नियन्तृनियमन तथाभूत बोधा-
र्थ क्रियाक, बोद्धृबोधन तथाभूत क्रियार्थ क्रियाक कर्तृ
करण तथाभूत सङ्कल्पार्थ क्रियाक सङ्कल्पयितृ सङ्क-
ल्पयितृ सङ्कल्पना विभागानेकरूपैकरूपस्वरूप-
कर्तृकरणत्वे कथञ्चिदपि न हि स्याताम्। सत्यम्।
नियति संकृत्योः क्रियान्तर्भूतत्व विवक्षया बोधस्य
च ज्ञानान्तर्भूतत्व विवक्षया च द्विविधं ज्ञान-
क्रियात्मकं साध्यं ज्ञानमेवेति पौष्करादिवत्।

अनयोर्ज्ञानयोर्हेतुर्विशेषात्मिका चितिः।
शक्तिरुक्ता विकल्पाख्या महती मूर्तिरैश्वरी॥

यद्यथा यादृशं यावत् कार्यं तत्कारणं तथा।
नित्यं कालानवच्छिन्नं कृत्या नन्वप्रदेशकम्॥

क्रमाक्रमसमुत्पत्तेः क्रमाद्युत्पत्तिशक्तिमत्।
तस्यास्ति करणं येन कृष्या वा करणाकृतिः॥
अनागामि च तत्त्वेयं कार्यस्यानादि संततेः।
करणं च न शक्यत्वच्युतिर्वा चेतना चितः॥
विषया नियमादेवं बोधे कृत्ये च तत्तथा।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

करणेन विना कार्यं कुर्वन् कर्ता भवेदिति ॥
मतिरेवा मदुक्तैव युक्तिप्रत्यक्षबाधिता ।
चिच्छक्तिश्च परापेक्षी बोधनान्नान्यापरः ॥
148. b. न तस्याभिमुखीज्ञानं मातामानं परोन्मुखम् ।
परं प्रमेयं भावादि व्यापारः फलमिष्यते ॥
निर्विकल्पादिकं ज्ञानं प्रमाणफलमर्थतः ।
परार्थमात्रसंवित्तिरूपं तच्छक्तिसंस्थितम् ॥
सहजत्वस्य तस्यैव लक्षणेन निरूप्यते ।
तस्मिन्निरुद्धे तत्कार्यं प्रत्यर्थं वेदनात्मकम् ॥
न जायते ततः कार्यतिरोधानं मलात्स्थितम् ।
तत्रेन्द्रियानपेक्षं च सर्वथात्यक्तबन्धया ॥
चिच्छक्त्यानन्ययोगाच्च योगस्वाभाविको मतः ।
अग्निर्दाहसमर्थोऽपि स्फोटेऽङ्कुरिमपेक्षते ॥

इत्यादि श्रुतेर्दाह्यप्रकाश्ययोग्यतासापेक्षाग्निदाह-
प्रकाशवच्छ्रेयकार्ययोग्यतामपेक्ष्य तत्सन्निधौ
नैरन्तर्यात् समुद्भूतव्यक्तेन नीरन्ध्रत्वोपलक्षित
निर्विकल्पितत्वेनाकारेण सहजसमुद्रेकमात्रतया
साहय्यार्थ प्रत्यर्थ परार्थ स्वार्थ विषयाविभाग निय-
मबोधक्रियासङ्कल्पगर्भतया साहय्य भूतार्थ
मात्र तदन्तः प्रत्यर्थ विषयैकज्ञानार्थक्रियाक

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कर्तृकरणभूता शिवशक्तिर्मुक्तशिवशक्तिर्वा सिद्धेति
सर्वमनवद्यम्। ततस्तद्वत् करणत्वप्रतिपादक-
बहुश्रुतिस्मृतिप्रत्यक्षविरोधादाश्रयाश्रयिभावस्य
प्रागेव निरस्तत्वाच्च। प्रमाश्रयत्वं प्रमाणत्वं पुन-
र्व्यापारः फलमित्यत्रापि विषयनिष्ठैतद्वत्
विषयव्यापारो वा फलमित्यादिभिः केषाञ्चित्परि-
भाषा न साध्वी। किन्तु प्रमाकरणं प्रमाणमिति
निरुक्तिरेव शिवसिद्धान्ताविरोधिनी सर्वत्र साध्वी।
ननु यत्करणं तत्कार्यं यत्कार्यं तद्भिन्नं यथा चक्षुरा-
दिकम्। सत्यम्। अनागामिन्य तद्दोषमिति मृगेन्द्रो-
क्तैः श्रीरामकण्ठादिभिर्निरूपकगुरुभिरपि। यद्-
चेतनं करणं तत्कार्यं तद्भिन्नत्वमिति व्याहारसङ्कुचितत्वाच्च।
विषयसान्निध्यत्वाल्लक्ष्यसमुद्देकतया सहभावतया
नैरन्तर्येण साधनमिति कृतिद्वयं क्रियावत्तां च शक्ति-
भूतभिन्नत्वं करणं सिद्धमिति सर्वमनवद्यमेव। ततो

मुक्तशिवानां स्वे निश्वासकारिकायाम् शिवस्योक्त
सर्वज्ञतादिषड्गुण्योऽपि न विद्यन्त इति शिवस्य
कृपासिद्धकृत्यपञ्चकृति रहित मुक्तशिवस्य चासङ्कु-
-चित दृक्क्रियत्वे सावर्ण्येऽपि कृत्यपञ्चककृतिरहित
तथा तदुभयोरपि कृत्यकरणे श्रुतिरहित तत्रतावत्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवकृत्यकरणप्रतिपादकग्रन्थो नारायणसंहितायाम् ।
इदमित्थमिदं नेत्थं भवेदित्येवमात्मिका । इच्छाशक्तिः
र्महेशस्य नित्यं कार्यनियामिका ॥ ज्ञानशक्तिस्तु
कार्यं तत् करणं कारणं तथा । प्रयोजनं च
तत्त्वेन बुद्धिरूपाऽध्यवस्यति ॥ यथेप्सितं क्रिया
शक्तिर्यथाऽध्यवसितं च यत् । कल्पयत्यखिलं कार्यम्
क्षणात्सङ्कल्परूपिणी ॥ मालिनीविजये च :

ज्ञापयन्ती जगत्सर्वं ज्ञानशक्तिर्निगद्यते ।
एवं भूतमिदं वस्तु भवत्विति यदा पुनः ॥
ज्ञाता तदैव तद्वस्तु कुर्वन्त्यत्र क्रियोच्यते ।
149. a. सैव मतङ्गे : अथ पत्युरधिष्ठानं स्वशक्तिकिरणात्मकम् ।
तस्यां दिवि सुदीप्तात्मा निष्कलो व्याप्तमूर्तिमान् ॥
काष्ठा सैव परा सूक्ष्मा सर्वदिक्कामृतात्मिका ।
प्रध्वस्तावरणाशान्ता वस्तुमात्रातिलालसा ॥
आद्यन्तोपरता साध्वी मूर्तिस्त्वेवोपचर्यते ।
तस्मादेव परत्वमचलं सर्वतोमुखम् ॥
यस्मिन्प्राप्तस्य न पुनर्जन्मेहास्ति कदाचन ।
शान्त्यतीतं. परन्तत्त्वमविनाश्य व्ययात्मकम् ॥
येनोन्मीलितसद्भावाः पशवः शिवतां गताः ।
सदाशिवस्य देहस्य लयस्तत्त्वेति निष्कले ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चतुर्मूर्तिमयं शुभ्रं यत्तत्सकलनिष्कलम् ।
तस्मिन् भोगस्समुद्दिष्टः पत्युर्विश्वस्य सर्वदा ॥
अथाधिकारिणः पत्युः क्रीडतः परमं पदम् ।
स्वतन्त्रस्यापि वक्तव्यम् स्वभावोऽस्य यतः पुरा ।
क्रीडंस्ततो यतीर्यासु विद्यौ सपरमेश्वरः ॥
सांसिद्धिकेन भावेन यथा सानुपबृंहितः ।
अतिरस्कृतवीर्येण प्रभावेणातिसर्पिणा ॥
सर्वाध्वप्रकटेनायं कर्ता कार्यस्य विश्वशाड्गियुक्-
-लय भोगाधिकारावस्थात्रय मुलाभिव्यक्तायां शक्तौ
स्वरूपत्वेनान्तरिथत्वाविर्भूतामित्यवस्था विशेषेण-
कृत्वा । पौष्करे – : लयावस्थां यदा प्राप्ता तदोदासीन-
-रूपिणी । कार्याभावादुदासीना साम्यावस्था तदैव हि ॥
विज्ञानक्रिययोस्साम्यं यस्मादुद्भुतकार्तृषु ।
ततो हैतत्करोमीति व्यापारे साम्यमेतयोः ॥
अधिकारे क्रियोद्रिक्ता कार्येष्वधिकृता यतः ।
कार्यं च करणीयन्तु गुण सङ्कल्प संस्मृतिः ॥
अनयोर्ज्ञानयोर्हेतुरविशेषात्मिका चितिः ।
शक्तिरुक्ता विकल्पा सा महती मूर्तिरैश्वरीति ॥
मुक्तशिवकृत्यकरण प्रतिपादक ग्रन्थ श्रीमन्मतङ्ग-
तदैवोच्चलिता चित्स्याच्चेतनोच्चलने क्षमा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चैतन्यमपि तद्योगादनुगृह्णाति पुद्गलः ॥
मोक्षकारिकायाम् :- यत्कृत्याद्धि निर्मुक्ता स्सर्वगोचर
बुद्धयः । मुक्तास्ते तेन कार्येण भेदवादि स्समन्विताः ।
अविभिन्नाधिकारास्ते शिवेनोक्तास्तु सूरिभिः ॥
रामनाथ कारिकायां च :-

मुक्ताश्शिवेन दीक्षाख्य शक्त्या विच्छिन्न बन्धनाः ।
अभिव्यक्त शिवत्वाच्च स्वप्रेर्यत्वाच्च मोचिताः ॥
ते च सृष्ट्यादि कर्तार स्सर्वज्ञाश्च यथा शिवः ।
तत्र कर्तृत्वयोग्यस्तेषां स्वरूपं स्याद्वयोऽपि ॥
अभिव्यक्ते परित्वन्तु न शक्येते कथं त्वन ।
शक्येते चेत्स्वरूपत्वमेव नस्यात्तयो स्तदा ॥
सङ्कल्पाद्येव सर्वेषां कर्म सृष्ट्यादि पञ्चकम् ।
यद्वस्तु जालं यत्काले योग्यं सृष्ट्यादि कर्मणः ॥
तस्मात्सृष्ट्यादि सङ्कल्प समन्तेषां तथा भवेत् ।
नैव सङ्कल्प वैषम्यं तेषां तद्धेत्वभावतः ॥
शिव एव करोतीति श्री भक्तौ न यौक्तिकः ।
अतः कर्तृ बहुत्वेन कार्यन्न भवतीत्यसत् ॥
साधितं कारिकास्वेतत्सद्योज्योति गुरूत्तमैः ।
H9. b. श्रीमन्मतङ्गवृत्तौ च रामकण्ठेन सूरिणा ॥
ये च धर्माः शिवे सन्ति ते धर्मा स्सन्ति तेषु च ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

किन्तु ते साद्यस्सर्वे व्यापकत्वादिना विना ॥
तथाप्युपास्यस्सर्वेषां पशूनां परमेश्वरः ।
अतस्स एव सर्वेषां प्रयच्छति च वाञ्छितम् ४
अनन्यभावेन संसिद्धमुक्तानां कृत्यपञ्चकम् ।
कृपयालु शिवस्यैव स्वार्थं निष्ठा हि ते यतः ॥
न ते विश्वस्य कर्तारः कर्ता च शिव एव हीति।

अयोगिनां तु शाब्दबौद्धवृत्ति सापेक्ष श्रोत्राणां त्वक्चक्षु-
-रादि क्रमेण ग्राह्य काठिन्य स्पर्शो पाषाण संहत विचि-
-त्र परिणत गुणि व्यवहार क्षम रूपरसगन्धस्पर्श
शब्द समष्टिभूत पृथिवी प्रभृतिषु समुत्थ निर्विक-
-ल्प स्फुरित त्र्यश्र चतुरश्र वृत्त ह्रस्व दीर्घादि संस्था-
-न पीतादि वर्ण द्विरूपादिक सोपस्फुरित नानाविध-
गुण ग्रहण पूर्वं पृथिवीति नाम जातिका चतुरश्र रूप-
-वती सुगन्धवती दुर्गन्धवती मधुरादि रसवती पुन-
-रशीतोष्ण स्पर्शवती खट खटानि शब्दवती धृति-
-मती पृथिवीत्यादि नाम जाति गुण क्रियैकत्व निर्धारण
योजनाभ्यां गुणि ग्रहणं सिद्धत्वादुक्तम् भोगकारिकासु

चित्रस्वाभाविकाः प्रोक्ता गुणाभिन्नाधराश्रयः ।
क्रमव्यङ्ग्या यथा चित्रम् पटे रूपं तु बोधिते ॥
विशेषण विशेष्यत्व व्यपदेशस्य धीभिदाम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

क्रमव्यङ्ग्यत्वतो हेतो र्गोचरत्वं प्रभात्यसौ ॥
नागृहीतेस्तु गन्धाद्यैर्जलादि तु विभाव्यते मतिः ।
धरित्र्यां हि जलादीनामग्रहेऽपि प्रभाव्यते ॥
गन्धादिभ्यस्ततो जन्या जलादिभ्यः पृथक्च भूः ।
जलादित्वेन मेवायं योज्यो हेतुर्मनीषिभिः ॥
संस्थानञ्चापि वर्णश्च रूपाद्विविधमिष्यते ।
तस्मादसिद्धता नास्ति हेतो रूपाहिते मणाविति ॥

अलमति सूक्ष्म विचारेण मन्दमति तपस्विजन मनः-क्लेश कारिणा प्रासङ्गिक प्रसृतेन प्रकृत मनुसरामः । जगतो विवादाध्यासित विश्वस्य कर्तास्ति कार्यत्वात् । ननु जगति कार्यत्वमसिद्धत्वात स्वरूपासिद्धोऽयं हेतुः । तन्न । स्त्री पुन्नपुंसकत्वात् । स्त्री पुन्नपुंसकानां भोवन-शरीर सम्बन्धानां सादित्वात् । नैनश्वर्याविना भूत्वा भूत्वा भावित्वात् । गुण गादित्वात् नीलादि वर्ण-लक्षण चतुरश्रादि संस्थान नाना प्रकारलक्षण रूपा-दि गुण पुञ्जावयव सन्निवेश विशेषत्वेन विवक्षितात् सावयवत्वात् । पुनरादित्वात् सादृश्यमेव शैवेऽव्वेतर-वन्या सत्य पृथक्पदार्थात्मिका ऽव्वतय नुगुण ~~नित्या~~-नित्यानित्यात्मिका जातिरिति तदेतद्विलक्षणं नैय्या-यिक वैशेषिकादि मत सिद्ध जातिकल्पनाणुना-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-अपि पक्षीकृतत्वेनाभिकाङ्क्षितकत्व विधुरशङ्काचैतन्ये
सति नाना प्रकारत्वबाधानन्तरगृहाचैतन्ये सत्यने-
150.a. -कत्वाच्चेति त्रिधा विवक्षिता हेतोः कार्यकर्तृत्वात्
कार्येति भावनिर्देशः कार्यत्वानुमितेस्सिध्यात्
कार्यत्वात्कर्तास्तीति सम्बन्धः । यद्यत्कार्यं
तत्सकर्तृकं यथा घटादिकं तथा चेदन्तस्मात्तथा ।
यद्यकर्तृकं तदकार्यं यथा महामायाकालमायादिकं
न तथा चेदन्तस्मान्न तथा । ननु घटादिकस्य
जगत्पक्षकुक्षिनिक्षिप्तत्वात् दृष्टान्ताभावः । तन्न ।
विवादाध्यासितस्य जगत इति विशेषितत्वात् ।
ननु तर्हि घटादिके शिवस्य कर्तृत्वं नास्तीति
सर्वकर्तृत्वक्षतिस्स्यात् । पुनस्सर्वज्ञस्सर्वकर्तृत्वा-
-दिति तदधीनस्वसिद्धिक सर्वज्ञत्वक्षतिरपि स्यात् ।
तन्न । तत्रापि तस्य प्रयोजककर्तृत्वात् । ननु
स्त्रीपुन्नपुंसकेषु केचित्कार्यत्वसाधकत्वादित्वम-
-भूत्वा भावित्वादिकं तदुपलक्षकवैलक्षण्यं वा दृष्ट-
-पि क्षित्यादिषु केषुचित्तादृग्दृष्टिगोचरं न स्यात् ।
सत्यम् । मूर्तत्वात् विशिष्टत्वात् परेषां मध्यस्थ-
-त्वात् सावयवत्वात् दृष्टिगोचरक्षित्यादिस्थिते-
-र्घटादिस्थितेरिव सृष्टिसंहारपौर्वापर्यादचैतन्ये

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सत्यनेकत्वोद्भूति हेतु षड्गात् कर्तृसाधककार्य-
-त्व साधकमभूत्वा भावित्वं वैनश्वर्यं वा साक्षात्
कर्तृसाधकं कार्यत्वं वा क्षित्यादि पक्षे साध्यते ।
सांख्यैरप्युक्तम् कार्यकरणलक्षणम् । हेतुमदनित्य-
-मव्यापि सक्रियमनेकमाश्रितम् लिङ्गं सावयवम्
परतन्त्रं व्यक्तम् विपरीतमव्यक्तमिति । स्त्रीपुन-
पुंसकादिवादिति हेत्वन्तरं वा भवतु । सर्वैः कर्तृ-
साधने पर्यवसानात् । ननु क्षित्यादिषु विद्यमानस्य
सावयवत्वादेर्वैशिष्ट्यान्नात्र कार्यत्वं कल्प्यं तत्र
वैशिष्ट्यमनपेक्ष्य कार्यमात्रेण सावयवमात्रस्य । तथा-
-त्वहेतोरपि व्याप्तिग्रहणात् । ननु तर्हि साध्यवैशिष्ट्यं
कथं सिध्येत् । सत्यम् । साध्यवैशिष्ट्यादिति हेत्व-
न्तरात्सिध्यति । तदुक्तं मृगेन्द्रादिके :

वैशिष्ट्यं कार्यवैशिष्ट्याद्दृष्टं लोकस्थितावपि ।
यद्यादृशं यावत् कार्यं तत्कारणं तथा ॥

मूर्ता अवयवा येषां नानारूपपरिग्रहाः ।
ये मूर्ता ये च विश्लिष्टाः परेषां मध्यतस्थिताः ॥
ते कार्याण्येव दृश्यन्ते ग्रीवाद्यवयवा यथा ।
स्थूलावयवश्लिष्टत्वात् बुद्धिमद्धेतुपूर्वकाः ॥
ततोऽस्ति बुद्धिमान् कश्चिदीश्वरः प्रतियत्नकः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अदृष्टोपि स्वकार्येण दृष्टेनाऽनुमीयते ॥
एको हि नामवै रुद्रे हि स्थितस्स परमेश्वरः ।
ब्रह्मत्वात् ब्रह्मणत्वाच्च ब्रह्मैव शिवयोगतः ॥
विष्णुः प्रभवशीलत्वात् प्रभवो जगतां प्रभुः ।
150 b रुजा द्रावयते यस्मात्तेन रुद्रो रुजः क्षयादिति ॥
अतो विपरीतसाधकत्वाभावान्नाविरुद्धोयं कार्यत्वा-
-दिति हेतुः । विशिष्टव्याप्तिविवक्षायां च न तत्र विरु-
-द्धत्वम् । अविकलस्वकार्यवैशिष्ट्यात् कुलालोपि
स्वकार्यसर्वज्ञकर्तेति निश्चितत्वात् । ननु यथा
कुलालस्स्वकार्याद्न्यत्र पटादौ तदकर्तृत्वादसर्व-
-ज्ञस्सिद्धः तथा शिवोपि स्वकार्यजगतोन्यत्र
तदकर्तृत्वादसर्वज्ञस्सिद्ध्यतु । तन्न । शिवकार्य-
-जगद्व्यतिरिक्तं वस्तु नास्तीति श्रुतेः । नास्तीति कुतः ।
अस्तु तद्वस्तु भोगमोक्षकरं किन्तन्न । यदि भोगमोक्ष-
-करन्तर्हि ईश्वरकार्यजगत्त्वे हि निश्चितम् । यदि
न या तर्हि तस्मिन्नसति सति वा निष्प्रयोजने
वस्तुनि तस्य जगत्कर्तुरीश्वरस्याज्ञातृत्वाकर्तृ-
-त्वन्न दूषणम् भूषणमेव । तदुक्तम् शैवपादैर्यतस्त-
-स्य साम्भुपेयस्य वेदकः । यः प्रमाणमसाविष्टो न
तु पूर्वस्य वेदकः इति । परमार्थतस्तु नास्ति सिद्धा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-र्थ सपक्ष साध्यार्थ पक्षासत्त्व परीक्षा । शब्दो नित्यः कृतकत्वात् घटवदित्यत्रापि घटे विद्यमान लौहित्य पार्थिवत्वाद्यादिकं शब्दे किमिति न स्यादिति सर्वानुमान भङ्ग प्रसङ्गात् । नन्वेवं कर्तृ साध्य विपरीतानेक कर्तृव्याप्तम् कार्यं रथादिकमस्तीति विरुद्धोयं कार्यत्वादिति हेतुः । तन्न । अनेकेषां रथादि कर्तृणामपि रथादिकार्यकृद्दलैक स्थपतीच्छानुवर्तित्वात् । तन्नकर्तृकं कार्यं वनतृणादिकमस्तीत्यनैकान्तिकोयं कार्यत्वादिति हेतुः । तन्न वनतृणादीनां पक्षकुक्षिनिक्षिप्तत्वात् । सिद्धान्ते त्वान्तःपातितेतर-हेत्वाभासास्त्रय एव हेत्वाभासा इति कर्तृसाधनप्रवृत्तस्य कार्यत्वादिति हेतोरसिद्ध विरुद्धानैकान्तिक हेत्वाभास दोषानाघ्रातत्वा दस्मृतेर्भान्तिराधारो नि-विकारस्सर्वन कर्ता पुनरेक एव क्रमाक्रम समुत्पत्ति संहार विधाता कर्तास्ति । अत एव स तु न हि काल कर्म प्रकृति पुरुषादि रूपः । तदुक्तम्

नानीश्वरं भवितुमर्हति विश्वमेतत्

नहीश्वरं च नितरामयथा प्रमाणम् ।

तल्लोक वेद विदितेश्वर वर्जनेन

कोयं भ्रमः कतिचिदीश्वरमन्यमाहुः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

किं क्रमाद्यौगपद्याद्वा भवेत्कार्यमिहस्थितम् ।
आनन्त्यात्क्रमो दृष्टो यौगपद्येऽप्यसम्भवः ॥
कार्तुर्यत्कार्यकर्तृत्वं कार्यानन्त्यात्प्रतीयते ।
न कार्यं कारणाभावादिति मे निश्चिता मतिः ॥
युगपत्तत्क्रमेणापि कार्योत्पत्तिः प्रकृते ।
संहतानां शरीराणामेकस्यापि च सम्भवात् ॥
तेनैतत्कार्यकर्तृत्वम् युगपच्चाक्रमादपि ।
151. a. लयभोगाधिकारात्म व्यापारत्रयलक्षितः ॥
स्वभावाद्बहुलस्थानः पदार्थः पतिसंज्ञितः ।
साधारो यः पदार्थस्तन्निराधारोऽपि कृत्यकृत् ॥
अन्तरिक्षे निराधारो दृष्टः काष्ठादिकम्पनात् ।
कालस्तरुष्वमूर्तोऽपि करोति कुसुमोच्चयम् ॥
फलानां च तथा शेषान् पतनं च यथा निशम् ।
तथोत्पत्तिविनाशानां कर्ता शम्भुरमूर्तिमान् ॥
अयस्कान्तगता शक्तिरमूर्ता कुरुते क्रियाः ।
जडस्पन्दक्रियायां वा शक्तिरस्या कर्तृता च्चितः ॥
व्याप्ते रस्पन्दरूपेण सिद्धावस्कान्तवत्स्वतः ।
व्यापारे नैव दृश्येत कार्यमेव प्रतीयते ॥
यथांशुभिरविश्चन्द्रः कमलोत्पलसंहतेः ।
विकासाकुञ्चने कर्ता न हि भिन्नस्थितस्वतः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लय भोगाधिकाराणा मनभेदो वास्तवाहितावे ।
किन्तु विबोधेरणुनां च वास्तवा नाव ते मताः ॥
अन्यानपेक्ष बीजादि सामग्री यदुद्भूते ।
महदादि विकारौघ परिणाम स्वभावकम् ॥
त्रिगुणात्म प्रधानं च तेन सांख्यैरनीश्वरम् ।
कालस्सृजति भूतानि कालस्संहरति प्रजाः ॥
कालस्सुप्तेषु जागर्ति कालो हि दुरति क्रमः ।
अत्र ब्रूमो न कालोयम् जगत्सृष्ट्यादिकर्मणि ॥
जडत्वादस्वतन्त्रत्वादन्यमीश मपेक्षते ।
जडत्वे सत्यनेकत्वात् सिद्धा कालस्य कार्यता ॥
अनित्यस्य जडस्यास्य कथमीश्वरता भवेत् ।
प्रधानं च तथा ज्ञेयमस्वतन्त्राज्जडत्वतः ॥
अनुक्तानीशता सिद्धा कर्मणोपि तथात्वतः इति ।
स कर्ता कोनेति यदि पृच्छसि तत्रोच्यते । सकर्ता
शान्तदर्थ क्रिया योजनात्मक स्थितिकृत्योपायातं
क्षित्यादि शिवान्त तत्त्वतात्त्विक रूपं जनाकृत्वा
साक्षात्परं परया च स्वस्वकारणे विलयं कृत्वा सृजति
तथा व्यक्ती करोति चिदात्मनां जगद्व्यापिकारेण ।
तिरोभूया विर्भावयति । यस्मादस्मात्कारणात् प्रभुः
कर्ता हरति पशुभ्यः पाशान् पुंसो ष्वहर्व पदन्वय-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-तीति हर इति सिद्धव्युत्पत्तिको हर शिव एव श्रीकण्ठ विवक्षया व्याख्यायमाने क्षित्यादि गुणान्तजगदिति व्याख्येयम्। ओकनस्य पाको देवकृतस्य पाको वेतिवत् सृष्ट्यादि पञ्चकृत्याभिक्षाकलय भोगाधिकारव्यापारत्वलक्षितत्वात्। कर्तुः शिवस्य सृष्टि संहार स्थिति कृत्यानां कृत्याऽनुग्रहस्य च वक्ष्यमाणत्वात् तिरोभावकृत्य माह।

स्यन् अन्यस्सन् व्याप्तितो नव्यः कर्ता कर्मानुसारतः॥
करोति संसृतिं पुंसां माया सबनेतया। २।
पाशावलोकनव्यक्ता स्वरूपावलोकनं हि यत्।
आत्मव्याप्ति र्भवेदेषा शिवव्याप्तिरतोऽन्यथा॥
१६१. b. सर्वज्ञादि गुणावेशो व्यापकान भावयेदाऽक।
अनेनैव शरीरेण परां व्याप्तिमखण्डिताम्॥
प्राप्नुवन्ति महाधीरा धन्या हि शिवयोगिन इति

स्वच्छन्द्रतन्त्रवचनात्। व्याप्तितः शिवव्याप्तितः शिवत्वाभिव्यक्तेरनन्तरम्। अनन्यः सादृश्यं यस्य नास्त्यादि तं प्रत्येतव्य शोभते इति शिवस्याऽत्मनः स्सवान जातीय इति च शैरव वृत्तिकारोक्तेर्व्याकृत्य-पृथग्विवक्षित निनत्यानातविनत्य मानित्यानातानित्यं सादृश्यमेव जातीनामिति शैवसिद्धान्तसमर्थ-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्त्वात् सादृश्यलक्षणजातिसम्बन्धवान् । यद्वा
इत्त्रर्थो यौगिके । अन्वयस्यान्यत्र सद्भावस्सर्वत्र व्यभि-
चारिणी । व्याप्तिरात्र पदार्थात्म लाभस्थिति निब-
-न्धना ॥ द्विधा सन्निधानेना परमात्मनि विधानतः ।
तत्र सन्निधिमात्रेण विदधात्यखिलस्थितिः ॥
यथार्को दिनचेष्टानां सन्निधेरुपकारकः ।
संकल्पार्थक्रियोज्जृम्भकारित्वं सन्निधिः प्रभोः ॥
बिन्दुमाया प्रधानानाम् विकृतिर्घृतकाष्ठवत् ।
बिन्दुरात्मनि नादादीन्ध्वनन्षडपि क्रमात् ॥
विचित्रैः परिणामैस्तैर्विदधाति शिवेरितः ।
यथा मृत्कलशादीनि कुलालाधिष्ठिता सती ॥
आसीत्सपूर्व सर्गादौ प्रबुद्धपात्पराद्विनात् ।
शब्दस्ततोऽभवस्तस्माच्छुक्लराशिरभूत्ततः ॥
तेषामेका परा योनिस्तत्तोजः पारमेश्वरम् ।
निमित्तमीश्वरस्तेषामुपादानां सबिन्दुरात् ॥
स्वकर्म सहकारिस्यात् कार्यत्वस्मात्सहेतुकम् ।
उपादानमतो बिन्दुर्यस्माद्वर्णा न तद्विना ॥
बहुधावस्थिता वर्णाः कलना चेतना मता इति +
श्रुतेस्तयोर्व्याप्यो सम्बन्धोऽत्र सन्निधौ विधानतो
व्याप्ति रूपान्तेति व्याप्तिः । स्व सङ्कल्प सान्निध्य-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

समुत्पादित महामाया माया कार्यकरण कलितवपुः
पुरुषप्रदेश देशकालसद्भावात् अनन्यः तिरोभाव-
कृत्य निवर्तनक्षम सङ्कल्पसन्निधिमान् कर्ता ·
अन्यस्सन् पुनरधुना शिवव्याप्त्यपरनाम शिवत्वा-
भिव्यक्तेरभावात् पशुत्वेन विसादृश्यलक्षण वि-
जातितो विसंबन्धवान्भूत्वा । यद्वा व्यतिरिक्तव्यक्ति-
भूत्वा समवेतया समवायसम्बन्धिन्या आज्ञया
विधिनिषेधात्मिकया व्यवस्थया सृष्टिस्थिति संह-
तीनां कर्तृत्वेन प्रथमसूत्र प्रतिपादितो दनुग्रहस्यो-
त्तर प्रतिपादनीयत्वात् संसृतिं कुत्सितत्वापि स्व-
कर्मफलभोगवप्रच्युति लक्षणतिरोधानम् स्व-
कर्मानुसारतः करोति । केचित्पुनरन्यशब्दो वि-
शिष्टाद्वैत विवक्षया खण्डाकार सच्चिदानन्द शिवान-
न्याद्वैतवत् पुंसु तयाप्यो न्यस्सन् संसृतिं करो-
सू. २ तीति व्याख्याताः । तन्मन्दमेव । तथाहि । नीलो-
त्पलं रसफलमित्यादिवत् शिवश्चासौ मुक्तश्च शिव-
मुक्तः इति नहि मुक्तस्य शिवेन सह शिव विशिष्टाद्वै-
त्वम् । दृष्टान्त दार्ष्टान्तिकयोर्धर्मधर्मिणो द्विधर्मि-
त्व वैषम्यात् । तथात्वेपि नीलादिवर्णवृत्तादि संस्था-
नरूप रसादिस्वरूपमेव नीलोत्पल नीलादि व्यति-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-रिक्तं नीलात्मकमिति वस्तु न किंचिदस्ति । गुण
एव गुणो गुणीति प्रागेव प्रपञ्चितत्वात् । यत्तु खदि-
र इतिवत् विशिष्टैकदेशव्यवहारमात्रेण धर्मधर्मि-
णोर्विशेषणविशिष्टत्वमुपन्यस्तम् । पुनरित्थमा-
-स्थितिश्चेत् शिव एव मुक्त इति शिवव्यतिरिक्तो न
मुक्तः कश्चिदस्तीति विवर्तवेदान्तसिद्धान्तवद् ब्रह्म-
शुद्धाद्वैतम् पृथक्पृथक् मिथ्यात्वं स्वसंवेदनप्रत्यक्ष-
निरस्तं विरुद्धमनिष्टमापतेत् । ननु विशिष्टाद्वैते मुक्ती-
देवदत्त इत्यादिकमेव पुनरगिरयः पिशाचो यज्जलं
लवणं द्वीपः कर्पूरमित्यादिकं बहुधा लोकेऽस्ति तद्वत् । तथा
चेद्विशेषणप्रविष्टत्वेनास्वतन्त्रत्वं मुक्तत्वेना-
-नित्यत्वादिकमापतेत् । तत्स्वतन्त्रत्वादिकमात्मा-
-नामनिष्टमिष्टमेव । तन्न । विनाद्वैश्यासितो न युक्तं ।
अस्वतन्त्रत्वात् । सकलापरमुक्तवादित्वेनुमानं निरस्त-
-त्वात् । तत्त्वस्य तत्त्वमनादिसिद्धस्यापि कलादिबद्धवत्
नौपाधिकं स्थूलं गतं शिवमात्रपर्यन्तम् सूक्ष्मं
स्वाभाविकं स्वरूपं किंचिदस्ति यदेव तत्त्वमपि न
हि शुद्धशैवसिद्धान्तिकेऽपि प्रत्यभिज्ञादि मता-
-न्तरप्रविष्टत्वात् । तदेवास्तु पुनरुद्धृता मात्रमुप-
-क्रान्त वादसमाहरणादिः तद्विरुद्धो भूत्वा तथा नदामि ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अहो बत । त्वं शैवसिद्धान्तगुरुवरं परित्यज्य कथ-
मित्थं कथयसि । विवाहाध्यासितो न मुक्तः । असंपू-
र्णमनोरथत्वात् सकलापरमुक्तवदित्यनुमानेन
वयो नावृत वीर्यस्य सोत गवा विलोक्षणात् । स्वाभा-
विकं योन्मुक्तेषु मुक्तशब्दो निवर्तत इति श्रुतेश्च
प्रयोक्त्रकर्तृत्वादिति पराजिते पलायिते सति
त्वं क्व गमिष्यसि ननु पुनरिमां वार्तां स्वप्नेऽपि
न स्मरन् पुनरागत्य शैवसिद्धान्तगुरुवरचरणयो-
र्निपतिष्यामि यद्येवं शतवर्षजीवी भव त्वं सुखी
भव । अथ तथास्तु सम्पूर्णमनोरथत्वे शिवसमवा-
दिमतस्य शिवसिद्धान्तिना ननु सर्वत्र समानता ।
तदुक्तम् श्रीमच्चिन्त्यविश्वे — सकले निष्कले चैव सर्व-
त्रैव समानता । सायुज्यमिति तत्प्रोक्तं सारूप्यं मूर्ति-
तुल्यतेति प्रागनवच्छिन्नीय संसिद्धा पृथगाच्छादितकृत्य-
पञ्चकं चास्तीति प्रपञ्चितम् । ततो मुक्तात्मनो
मुक्तो भूतात्मान्तरात्मतत्त्वात्मजीवात्मकवन्नात्मो-
पाधिकात्मत्वनिर्मुक्तेर्यथा स्वं स्वात्मात्म स्वात्म-
नैरन्तर्य भूत वास्तवशिवव्यक्त्यद्वैतशुद्धशिवभूत-
स्वात्मशिवशुद्धाद्वैतिनो भवन्ति । पुनः शिवस्या-
त्मानस्समान जातीय इति वृत्तिकारोक्ते शिवत्वात्म-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

152. b. साद्दश्यलक्षण शिवजाति मात्र विवक्षितैक शैव कुली-
नैक शिवजात्यद्वैत शिवात्म शिवात्मशिवविशिष्टा-
द्वैतिनोऽपि भवन्ति । तर्ह्येवं समाधिर्ति सर्वमुभय-
ग्राह्यं सोऽहं शिवोऽहमित्यादिकं सुकरं भवेत् । तदुक्तम्
सर्वज्ञानोत्तर स्कन्द कालोत्तर विद्यासार संहितासु
शैव वृत्तिकार वृत्त्यनुविधातरि ग्रन्थे च ।

शिवोऽन्यस्त्वहमेवान्यः पृथक्भावं विवर्जयेत् ।
य शिवस्सोऽहमेवेति अद्वैतं भावयेद्बुधः ॥
शिवमेव स्वयं भाव्य शिवमेव स्वयं भवेत् ।
समरसी भावयोगेन तत्समाधिरिहोच्यते ॥
सर्वज्ञाद्यं शिवैश्वर्यं लब्ध्वा स्वात्मनि राजते ।
तत्साम्यमिति प्राहुर्वेदागम परायणाः ॥
शिवस्सभाव जातीयो ह्यात्मनस्सम लक्षण इति ।

ननु एवं स्वात्म शिव स्वरूपव्यक्ति शिवात्म शिवजाति
विवक्षायां सत्यामपि सर्वज्ञानोत्तर स्कन्द कालोत्तर-
श्रुतिरनादि मुक्तशिव शङ्काद्वैतवादे पुनरनादि
मुक्त शिवव्यक्ति विशिष्टाद्वैते वा पर्यवस्यतीति
कथं केचिदूचिरे । ते मूढमतयः । परिविस्तृत-
ग्रन्थेषु पौर्वापर्यालोचना विहीना भ्रमन्तः प्रलप-
न्ति । पर्यालोचिता सा श्रुतिः प्राक् प्रोक्तवत् स्वा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

त्म शिवरूपाद्वैतं शिवात्म शिवजाति मात्र विशि-
ष्टाद्वैतं च कथयति । न शिवात्म शिवरूपाद्वैतं पुनरत्र
एव स्वल्पारोपित शिवाद्वैत इति पद्धति दीक्षायाम् शिव-
कर्तव्यत्वेन शिवात्म शिवरूपाद्वैतमुपचारबीजम्
पर्यवसितोपासनामात्रमुपलक्षित शिवात्म शिव सादृश्य
जात्यद्वैत विशिष्टाद्वैत स्वात्म शिवरूपाद्वैत फलं पद्धती
विनिर्गता । न तु शिवात्म शिवरूपाद्वैतमुपचारबीजं
पर्यवसितोपासनामात्रमुपलक्षित शिवात्म शिव सादृश्य
जात्यद्वैत विशिष्टाद्वैत स्वात्म शिव रूपाद्वैत फलं पद्धती
विनिर्गता । न तु शिवात्म शिवरूपाद्वैत फलं सर्वशा-
स्त्रेतरे एव तदुपासनोत्थमुपक्रमेण फलश्रुतिः । शिव-
वाक्यार्थतस्वरूपस्पृष्टि धर्मा विवर्जित इति निर्गतेति
तच्छ्रुति विरोधात् पूर्वोत्तर तन्त्रीय बहुश्रुति विरोधाच्च ।
ततः स्वात्म शिवरूपाद्वैतमुपासना फलयोरेव अत्र
वास्तवम् । शिवात्म शिवरूपाद्वैतमुपासनायाम्
सर्वाधिष्ठान स्थितौ व्याप्तौ जातौ च । औपचारिकं
क्लृप्तम् । तदुक्तं चतुर्वेदार्थ तात्पर्ये स्कान्दे वायव्य-
संहितायां परार्ध्यायां च । अद्वैतभावमाशिरोभि-
रुपासनाया मुक्तत्वेति परमार्थतया न वास्तवम् ।
भेदस्फुटे गरुड मानित्रक योरलीक लाक्षात्मता भावन-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथापि विषं प्रमार्ष्टि ॥ विश्वं महाबाधितिष्ठती-
ति विश्वात्मतामुपलभन्ते यद्यागमास्ते तत्पवि-
ताविदित वेदरहस्य ब्राह्मणादिति कुत्सितयस्तु
तदेव सत्यम् । दक्षप्रजापति ब्रह्माणं प्रत्याह ।
सर्वस्य ब्रह्मतादात्म्यं सर्वं खल्विति सा श्रुतिः ॥
कथमत्यादरेणैव तातवक्ति जगत्प्रभो ॥ ब्रह्मा ।
उपचारेण सर्वस्य ब्रह्मतामाह सा श्रुतिः ।
भूलोके ब्राह्मणा यद्वन्मया भेदं वदन्तिते ॥
123.a. तथा सर्वस्य जगतो ब्रह्मत्वमिति निश्चयः ।
सर्वव्यापि तमीशस्य बोद्धा सा श्रुतिरन्यथा ॥
सर्वव्यापी महादेवस्तादात्म्यं वदति ध्रुवम् ।
येनोपलभ्यतेऽस्माभिः सकलो नापि निष्कलः ॥
समूर्त्यात्मा शिवस्यैव मूर्तिरित्युपलभ्यते ।
अण्डस्यास्याधिपत्यं हि श्रीकण्ठस्य न संशयः ॥
श्रीकण्ठाख्यां शिवो मूर्तिं क्रीडन्नधितिष्ठति ।
चिद्रूपत्वात्तदेकत्वं तत्तद्भेदो विभव भोगतः ॥
न श्रेयस्य स्वकर्माद्यैरसाविद्या वन्ध्यलक्षणा ।
तद्बुद्ध्या भवेद्विद्याद्वयमस्त्येकतात्र न ॥
विद्या विद्या विभागेन गतो द्वैत परिग्रहः । इति ।
तत इदानीं भाव्यादिकैः । पुनरेकादारभ्य परार्धपर्यन्तं

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पुनरिदमेकमिदमेकमिति विवक्षया द्वित्र्यादिकं
कल्पितमसत्यमस्थिरमेकमेवाकल्पितं सत्यं स्थिर-
मिति स्वकल्पित चिदचिद्वृत्तिलक्षित पारमार्थि-
कैकात्म ब्रह्माद्वैत महार्णवतामवलम्ब्य न किंचिद-
स्तीति श्रुतिरुक्तं पर्यवसितमेकात्मत्वमत्र युक्तम्।
शिवसमानजातीयानामात्मनामसंख्यत्वेन संख्या-
तीतत्वात्। ननु पुनरसंख्यातेषु चिदचित्सु
परमेश्वरः कथं संख्यातत्वेन वेदनं करोति ।
तन्नासंख्यातेषु संख्यातत्वेन वेदनं भ्रान्तमित्यसंख्या
तत्वेनैव वेदनं करोति। अन्यथा विपरीतवेदनत्वे
सतु न सर्वज्ञस्स्यात्। पुनर्घटाकाश महाकाशव-
ज्जीव ब्रह्माद्वैते जीवस्य गमनेन शरीरान्तरमिति
नित्यमुक्तब्रह्मप्रदेशे जीवत्वं प्राप्य जीवप्रदेशे
सद्यो मुक्तब्रह्मत्वम् पुनस्तत्प्रदेशे शरीरान्तप्राप्ते
जीवत्वमित्यसङ्गतं स्यात्। ततो भीत्या बन्ध-
मुक्ती न वास्तव्यौ किन्त्वौपाधिकौ चेदुच्यते।
तर्हि बन्धमुक्तिप्रतिपादकश्रुतीनामानर्थप्रदमानर्थ-
क्यं स्यात्। नन्वस्माकं विधानात् प्रत्यक्षस्यैकस्यैव
प्रमाणत्वाविशेषेऽपि प्रत्यक्षस्य निष्प्रमाणत्वात्
भेदग्रहणाशक्यम्। नैवन्तावन्निर्विकल्पार्थ-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बोधेरन्तरविकल्प सविकल्प प्रत्यर्थ बोधो स्त्येव स-
विकल्पार्थ बोधेपि पुनरयं घटोयं घट इत्येक जाति-
विषये सत्यपि बहिरन्योन्य साहृश्यलक्षण व्यक्त्य-
-व्यतिरिक्त पृथक् प्रतिव्यक्ति गत जाति विषयानु-
-वृत्तिरूपस्य तदन्तरति सूक्ष्म मिथ्या बाह्य वेद्यादि-
भाति भ्रम प्रक्षात् व्याप्ति, विषय व्यावृत्ति रूपस्यानु-
भव सिद्धत्वेन स्वस्व सादृश्य सम्बन्ध निबन्धन-
वैलक्षार वैमात्म स्वस्व विषय प्रत्यात्म स्व संवेदन
प्रत्यक्षै विरूपाधिका म नित्यप्रत्यात्म भिन्नानि-
-भेदन निबन्धनभिन्न भोगात् । तथा विद्याज्ञान-
153. 6. -नो स्मरणाद्वा प्रामाणिकस्य द्वैत निबन्धन ...
इत्यादिभिरनुमानैरागमैश्च भेद सिद्धिः । न हि
स्वसंवेदन प्रत्यक्षे भ्रान्तिरस्ति । तदुक्तम् । सर्व-
मालम्बने भ्रान्तान्यात्मनि कथं च नेति ।
प्रपञ्चितं च परमोक्ष निरासकारिका वृत्तौ तत्र
किञ्चिल्लिख्यते । न च स्वसंविद्सिद्ध मन स्वपर-
वेद्यत्वात् ब्रह्मवत् । स्वसंवेदने च परात्मभेदः
प्रत्येकं स्वात्मा परात्मानुमानतया भिन्न एव प्रकाशते।
तदभेदे हि सर्व संवेदं ब्रह्मेति कर्तृत्वकस्य किं कुर्या-
-दित्यसङ्गतम् विश्वं स्यात् न तत्र भ्रान्तिस्सम्भवति।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आत्मापि स्वप्नादिविज्ञानं सर्वमात्मकत्वेन भ्रान्त-
त्वस्वात्मानि कथं स्यात्। आत्मत्वानां च बहिःस्थित-
मन्यथा प्रतीयमानं भ्रमविषयतामापतति। यत्
पुनर्बोधैकस्वभावं वस्तु तद्यथैव चकास्ति तथैव
सत्स्व संवेद्यस्यातत्स्वभावत्वायोगात्। तत्स्वभाव-
त्वेन स्वसंवेद्यमेवेति। स्वसंवेदने भ्रान्त्यसम्भवात्।
आत्मभेदः प्रत्येकं परात्मानुमानात् तथा स्वसंवेदनेन
सिद्धः। सत्य एव श्रुतिरप्याह। तमेव भान्तमनुभाति
सर्वं तस्य भासा सर्वमिदं भातीति। ननु कथमहं दे-
हो देहोऽहमिति भ्रमः। सत्यम्। इदं रजतं रजतमि-
त्यत्र यथा पुनरिदमंशे न भ्रमः। तथाहमित्यवभासन
स्वसंवेदने न भ्रमः। किन्त्वहं देहो देहोऽहमित्यहङ्कार-
प्रत्युपाधितादात्म्येन देहविषयत्वयथायोग्यत्वकल्प-
बुद्धिवृत्त्यंश एव भ्रमः। तत्स्वसंवेदनप्रत्यक्षसिद्ध-
नानात्मा न प्रतिक्षिप्यते। पुनरेकात्मा निष्प्रमाणत्वा-
न्निरस्यते। भृगवल्ल्यादिके। वेदान्तेष्वेक एवात्मा
चिदचिद्भिर्लक्षितः। प्रतिज्ञामात्रमेवेदं निरत्ययः
किन्निबन्धनः॥ अथ प्रमाणत्वात्मा प्रमेयत्वं
प्रपद्यते। यत्र तदुभयत्वं चतुष्टयमपि स्थितम्॥
अद्वैतहानिरेवं स्यान्निष्प्रमाणकतान्यथा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ॥
समं तत्त्वं विजानीयाद्द्वैताद्वैतं विवर्जितमिति ।
ननु पत्युरसामञ्जस्यमिति व्याससूत्रार्थः । पशुपति
मतमग्राह्यमिति शाङ्कर भाष्ये भाषितः । मूढमतिभिः
प्रक्षिप्तमिदं वाक्यं न भाष्यकार कृतम् । तथापि न
शुद्धशैवमिदमिष्टं पाशुपतमिति नीलकण्ठभाष्ये
निरूपितत्वात् । यद्यशेषमप्यग्राह्यं तर्हि वेदानामनीश-
श्वरवादिभिः कृत स्वयं श्रुत्वनिरस्य कृतकत्वस्य
कण्ठघण्टारवेण साधितत्वात् । तथा कृतकत्वेऽपि
साक्षादीश्वरकृतत्वस्यापि निषिद्धत्वात् । शिवागमस्यै-
वैकस्य साक्षादीश्वरकृतत्वेन शिवप्रकाशकं ज्ञानं
शिवज्ञानं परं स्मृतम् । वेदाद्यपरविज्ञानं पशुपाश-
र्थदर्शकम् । यथा विलक्षणं चक्षुः श्रापायवत्विलाक्षयोः ।
तथा विलक्षणं शैवं ज्ञानमेतत्परापरमिति श्रीमत्कामि-
-कोक्तेः पशुपतिमतमग्राह्यं चेत् भवतामपि प्रशाशगलि-
-नाकदिवाकरमिति पर्यवसितम् । पशुमतं ग्राह्यमिति
परिहासः । ननु प्रमातृ प्रमाण प्रमेय प्र.. यो व्याव-
हारिका भिन्ना सन्ति । तर्हि ब्रह्मास्तीति श्रुत्यादि-
प्रामाणिकब्रह्मैक्य प्रमितिरपि व्यावहारिका सत्यसत्येति
न ब्रह्माद्वैत सिद्धिरिति द्वैतसिद्धैव व्याघमापतेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदुक्तं मृगेन्द्रे : नाव्यापको न क्षणिको नैको नापि जडा-
त्मकः। नाकर्ता भिन्नचिद्योगी पाशान्ते शिवता श्रुतेरिति॥
अथ द्वितीयसूत्रोपक्षिप्तपञ्चपदार्थमध्यो जन्तुरनीशो-
धमित्यादि लक्षणयुक्तं परीक्षितुमुपक्रमते ।

नेतितो

नेतितोऽमतो दृक्कादक्षोपहति बाधनः ।
एवापि निर्भागतो बोधे बोद्धृत्वाद्दृत्वणु सततौ ॥

ननु शिवपञ्चकृत्यपात्रीभूतात्मास्तित्वे साधकम्
प्रमाणमस्ति किम्। अस्त्येव स्वसंवेदनप्रत्यक्षान-
-न्न। लोकायतमतप्रविष्टानामस्माकं न तदपि स्वसं-
वेदनम् शरीराद्यपृथक्तयाहं विषयं भासत इति न
तत् पृथगात्मसिद्धिरिति न साधकं प्रमाणम्। तर्हि
नास्तीति बाधकम् प्रमाणमस्ति किंनास्त्येव ।
तर्हि नानुपलब्ध्यैव निर्णीतेर्थे व्याघातः प्रवर्तते ।
अपि तर्हि तु सन्दिग्ध इत्यत्र साधकबाधकप्रमा-
णाभावेन संशय एव युक्तः। पुनरुभयकोटिक सं-
-शय नाम सम्भावना वा । तर्हि प्रत्यक्षैकप्रमाणवादि-
नामस्माकमनुमानमनङ्गीकरणीयमापतेदिति
नयमेवानुमिनुमः। शरीरात्पृथगात्मा नास्ति
सत्त्वेनाभिमतत्वात्। यत्सत्त्वेनाभिमतं तत्तत्कुम्
यथा कुहकास्वनम्। तन्न तथाहि शिवयोगप्रत्यक्ष-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्वसंवेदनप्रत्यक्षसलोकवाक्यागमसिद्धशिवात्मनो-
ऽसाधनायानुमानमनप्रवृत्तं किन्तु तयोर्नास्तिता
शरीरता तद्धर्मतादि क्षणिकतादि सन्देह निरासाय
प्रवृत्तमनुमानम्। ततस्त्वात्मानुमाने परत्वप्रसङ्ग-
तच्छिवानुमाने स्वेतरात्मानुमानेपि प्रमेयत्व प्रसङ्गो न
स्यात्। अस्तिता साधनाय प्रवृत्तमप्यनादिमलस-
ऽच्छन्नो न जानाति स्वयं प्रभुः। तस्मात्परीक्षां
विज्ञानं स्वस्वरूपावभासकमिति इति श्रीकामिक-
श्रुते व्याख्यान स्वसंवेदनप्रत्यक्षासिद्धत्वेपि किंचि-
[ज्ज्ञत्वादि रूपेणान्यथा भासनात्। अनुमीयते। असतो-
नवभासनात्। किन्तु सप्तमी समास घटितं पुनरनु-
154.b. द्भूतं शशशृङ्गं शशे शृङ्गं नास्तीत्यभिप्रेतम्। तथा
निषेध्यत्वाथा श्रृङ्गमात्र विवक्षितमन्यत्र गवादिष्व-
स्तीति विधातुं च शक्यते। शशसम्बन्धि श्रृङ्गं शश-
श्रृङ्गं तच्च नन्निषेधानुविद्धं विद्धानुविद्धं च न भवति।
ननु वेदान्तिभिरसत्प्रपञ्चो ब्रह्मव्यतिरिक्तः प्रपञ्चो
नास्तीति निषिध्यते। तन्न तैरप्यसतोऽनवभासनान्नि-
षेद्धुमशक्य इति प्रपञ्चः पुनर्संश्चेन्न प्रतिभासेत
संश्चेन्न बाध्येत प्रपञ्चः प्रतिभासते बाध्यते च तत-
स्सदसद्विलक्षण भङ्ग्यन्तरेण शैवैर्गदितं गतम् ब्रह्म।

[ ] गवादिषु तस्य भागस्य मातृकायां द्विरुक्तत्वमिव दृश्यते।

P 691 line 7 to 692 line 6 is original.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-व्यतिरिक्तो ब्रह्म-व्याप्त्या रहितः प्रपञ्चो नास्तीति तत्रापि पर्यवसितार्थः प्राक् प्रपञ्चितः। देशकाला-नवच्छिन्ना सद्रूपेण दुष्ट चक्षुरादिना वा रजतादिक-मिव भासमाने शुक्तिकादौ रजताद्विनतया तथा तदेवं रजतमिति रजतादि-व्यधिकरणस्य रजतत्वप्रकारकं शुक्तिकादिविषयमतस्य विषयमत रसविषयत्वमवि-विषयत्वमासदर्थत्वं न विपरीतार्थ-चेति पुनरिदं रजतमि-त्यादि तद्व्यधिकरणशौक्ल्यादि सादृश्यमात्राक्षिप्तप्रका-रक भ्रमप्रमाणा] त्वेऽपि यद्यपि परत्व प्रसङ्गः स्यात्तथापि परमात् पारमार्थिक सर्वज्ञतादि स्वरूपस्य परोक्षत्वात् पुनरप्रमेयत्वेऽपि चिन्मात्र सादृश्य सम्बन्धेन चिच्छक्ति स्फुरण स्फुरिततया तत्तिवेदनमिति वय-मेवानुमिनुमः॥ अणुः पुनरणुरिति स्वातन्त्र्यसि-द्धसंज्ञाया नात्मास्ति नेतितः। न निषेधार्थः। गत्य-र्थानां ज्ञानार्थेष्वेकदावर्तनात् इण गताविति धातोः क्विन् प्रत्ययानुविद्धो-ऽयनस्तस्मुत्व ना इति शब्दोत्र ज्ञानार्थ इति कृत्वा नस्य नास्तेरिति तो नास्तीति निषेधस्यास्तीति विधिपूर्वत्वेन विधिज्ञानानुवि-द्धत्वाभावात्। यद्वा पुनरिति शब्दो-व्यय इति कृत्वा नेतितो विधिज्ञानानुविद्धत्वनास्तीति भाव-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-न्नास्तीति व्यवहारार्हो यो यो नेतिमान् सोऽस्तिमान्
यथा घटः। यद्यस्तिमन्न भवति तन्नेतिमन्न भवति।
यथा शशशृङ्गम्। ननु शशशृङ्गमपि नास्तीति
निषेधानुविद्धम् व्यवह्रियते न त्वस्तीति विध्य-
-नुविद्धम्। सत्यम्। शशशृङ्गं नास्तीत्यत्र शशस्येति
षष्ठी समासघटितन्तु शृङ्गम् शशशृङ्गं नास्तीति निषेद्धु-
-मस्तीति वा विधातुं केनापि न शक्यते। असतोऽन-
-वभासनात्। किन्तु सप्तमी समास घटितं पुनरुद्दिष्टं
शशशृङ्गं शशे शृङ्गं नास्तीत्यभिप्रेतम्। तथा निषेद्धुं
तथा शृङ्गमात्रविवक्षितमन्यत्र गवादिष्वस्तीति विधा-
-तुं च शक्यते। शशसम्बन्धि शृङ्गं शशशृङ्गं न त्विष्टं
तन्निषेधानुविद्धं विध्यनुविद्धं च न भवति। ननु
55.a वेदान्तिभिरसन् प्रपञ्चो ब्रह्मव्यतिरिक्तः प्रपञ्चो ना-
-स्तीति निषिध्यते। तन्न। तैरप्यसतोऽनवभासनान्नि-
-षेद्धुमशक्यत्वमिति प्रपञ्चः पुनरसंश्चेन्न प्रतिभासेत
संश्चेन्नाबाध्येत प्रपञ्चः प्रतिभासते। बाध्यते च
ततस्सदसद्विलक्षण भङ्ग्यन्तरेण शाङ्करैर्गदितं मतम्। ब्रह्म-
व्यतिरिक्तो ब्रह्मव्याप्त्या रहितः प्रपञ्चो नास्तीति
तत्रापि पर्यवसितार्थः प्रागप्रपञ्चितः। देशकाला-
-वच्छिन्ना सद्रूपेण दुष्टचक्षुरादिना वा रजतादिक-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-मिव भासमाने शुक्तिकादौ रजतादिवत्तया तथा
तथेदं रजतमिति रजतादि व्यधिकरणस्य रजतत्व-
प्रकारकं शुक्तिकादि विषयमतस्थविषयत्व निर्विष-
यत्वासदर्थत्वविपरीतार्थं चेति पुनरिदं रजतमि-
-त्यादि तद्व्यधिकरण शौक्ल्यादि सादृश्यमात्राश्रित प्रका-
-रक भ्रमप्रमाणत्वं नेदं रजतमित्यादि निरन्वयत्र स
केव रजतादिकं शुक्त्याद्यात्मैव निविशते नासत्।
अत्र वाद्यन्तर विप्रतिपत्ति व्यवहारा व्यवह्रियन्ते ॥
अन्यथा ख्यातिः सत्ख्यातिः असत्ख्यातिः अख्यातिः
अनिर्वचनीय ख्यातिरिति ख्यातिपञ्चकम्। तत्र
नैयायिकानामन्यथाख्यातिः। सा तु शैव सिद्धान्ति-
प्रमुखानां केषांचिद्विरोधिनी। रामानुजीयानां
सत्ख्यातिः। माध्वानामसत्ख्यातिः। प्राभाकराणाम-
ख्यातिः। वेदान्तिनामनिर्वचनीय ख्यातिः। पुन
स्तत्रापि व्यधिकरण प्रकारकं ज्ञानमन्यथाख्यातिः।
सामान्य भेदको विशेषः प्रकारः। ततस्तदपि व्यधि-
-करण प्रकारकत्वात् शुक्तिकायां व्यधिकरण रजत-
त्वादि विशेषण विशिष्ट विषयकमनुभवात्मकमेक-
मेव विज्ञानम्। ननु प्राभाकराणामिवानुभव स्मर-
-णात्मकं ज्ञानद्वयमिति यावत्। सद्विषयकं ज्ञानम्

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सत्ख्यातिः। शुक्तौ शुक्तित्वाज्ञानदशायां सादृश्य
दर्शन सामग्र्या च रजतमुत्पद्यते। तच्च सदेव तदिदं
रजतमिति प्रतीतेः। असद्विषयकं ज्ञानमसत्ख्यातिः।
असदेव रजतमभादिति प्रतीतेः। अगृहीता संसर्ग-
-धर्म्मधर्म्मिगोचरज्ञानमख्यातिः। तत्रेदमंशेऽनु-
-भवरूपं रजतांशे स्मृतिरूपं शुक्तित्वाज्ञान सादृश्य-
दर्शनाभ्यां रजतमुत्पद्यते। तच्चानिर्वचनीयं
सदसद्विलक्षणं सत्त्वेन न बाध्येत। असत्त्वेन न
प्रतीयेत। इदं च प्रतीयते बाध्यते च। ख्यातिबा-
-धान्यथानुपपत्त्या निर्वचनीयत्वसिद्धिरियमनिर्व-
-चनीय ख्यातिः। कुत्रचित्सादृश्येऽपि मलमाया कर्म
समुत्थ सम्युक्त मोह सम्भूत साहंकारिक बौद्ध विपर्यय-
मूलकलादिपञ्चकाविद्यादिपञ्चकद्विपञ्चकरूप-
-क पौरुष विपर्ययमोषयुष स्वसंवित्परसंविद्द्विधा-
-भूत शक्तिसमुत्थचिन्तोत्सव मुक्तस्वनादेहस्य चिद्रू-
-पत्वभासमानत्वेन देहतोऽक्षस्वनाच्चितो देहवद्व-
-भासमानत्वेन तथा तथा तद्विषयीकरणादहं देहो
155. 6. देहो हमित्यहन्ता देहताकारव्यधिकरणप्रकारक-
देहविषयमहं विषयं च सत् सविषयं ततो न निर्विष-
-यम् यत्तदपि ज्ञानमन्यथा ख्यातिरेव। पुनः पटला-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-दि समुत्थ पीतत्वद्विधाशिथिलत्व विपर्यय दोष-
-दुष्ट चक्षुश्शक्ति समुत्था निर्भासस्समुल्लेखना शङ्खा-
-देश्चन्द्रादेश्च पीतवत् द्विधा शिथिलवदवभास-
-मानत्वेन तथा तथा तत्तद्विषयीकरणात् । पीतश्शङ्खो
द्वौ चन्द्राविति पीतत्वादि द्वित्वाद्याकारेणाधिकरण-
प्रकारकं शङ्खादि विषयं चन्द्रादि विषयं च सत् स-
विषयत्वात् न निर्विषयं यत्तदपि ज्ञानमन्यथा ख्या-
-तिरेव । प्रसक्तानुप्रसक्तं प्रकृतमनुसराम: ।
यद्वा पुरस्तात् नेतित: नेति नेत्यात्मा गतिरिति श्रुतेर्नेति
नेति तत्व तात्विक विषय नियति रूपात् विवेकिनां
नाहं शरीरमित्यादि नियति कारकात्म मात्र शेषकार-
-कावगमात् । यस्तावन्नास्तिकस्स ना हि नाहं शरीरमि-
-त्यादि ज्ञानवान् । यथा लोकायतमत प्रविष्ट व्यात्रमुख: ।
अथ तथास्तु पुनरात्मनो नेति नेति नियति कारकत्वं
भवतां परिकल्पना मात्र न्नारम्भक मित्यात्मान स्थूल-
-देहादन्यत्व सिद्ध्यर्थं स्वशरीरान्तस्थ इति चेत् स
चात्मा सूक्ष्मदेहस्स्यात् पुनरन्तस्सूक्ष्म शरीर पृथक्-
परिहाराय बहि: परिमितत्वानित्यत्व जडत्व परिहारा-
-य च बहिरन्तस्सर्वत्रस्थ इति चेत् क्वचिदप्यणु-
मात्रमप्यनुपलभ्यमान इति स्वानुगुणभूत चैतन्य-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विशेषः । कार्य लवात्मेति लोकायतास्तान् प्रत्ये-
तत् तन्नास्ति तयो घनवदन्तस्तावति बहिरपि ध्रुवपर्य-
न्तो तयोः पृथगेव सांसारिक सोपाधिक देशकाला वच्छि-
न्न चिद्व्यक्तिमान् सन् मौक्तिक निरुपाधिक देशकाला-
वच्छिन्न नित्य निरतिशय निरुपमानिरुपचरित
शिवत्व व्यक्तिमान् भविता सर्वज्ञकर्ता यद्यपि किंचि-
ज्ञ कर्ता सन् घनवदणुरस्ति स्वसंवेदन प्रत्यक्षानुवि-
द्धाहंकारिक मयाहन्तो देहात् पृथक् सिद्धात्मनो-
देहात् मम देह इति स्वसंवेदनात्म स्वामिनः
परसंवेदनात्म स्वमेव स्वमपि स्व स्वामित्वेन तद्-
भिन्नाना नुस्यूत परसंवेदन प्रत्यक्षानुविद्धबोधात्मन
सम्मतोऽज्जृम्भात् यो यो नात्मा सन् ममतो देहवान्
यथा घटः । तदित्थं गोलक्षणात् स्वात् गोस्वामिवत्
देहलक्षणात् स्वात् देहस्वामी पृथगेव सिद्धः । एव-
देहात् बहिर्ध्रुव पर्यन्ते सर्वत्राप्यणुरस्ति ध्रुवावधि-
वस्तु ग्रहणात् मलावृत ज्ञानक्रियार्थ क्रियामात्रेणा-
व्यापकत्वास्यो पचारितत्वेन परमार्थतो व्यापकत्वाच्च ।
तदुक्तं श्रीमत्कामिके :- व्याप्यते व्यापकश्चापि
गम्यते गमकोऽपि च । असहायस्सहायी च साधक-
स्साध्यते स्वयमिति । ननु स्थूलोऽहं कृशोऽहमिति

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्थूलता इत्यर्थो स्थूलदेह सामानाधिकरण्य व्यवहारात्
मम देह इत्यादिवं राहो शिर इति वदुपचारितम् ।
156. १. शिरोमात्रस्य राहोर्यथा तथा देहस्यन्यो देहवानास्तीति
ननु यत्मा :: कर्म्मयोनिभिः प्राणशरीरात् पृथगा-
त्मा विवक्षितः । तद्व्यतरेस्तु तत्र प्रत्युत राहो-
शिर इति वद्व्यधिकरण प्रकाशकत्वा दृष्टान्तस्यासि-
स्थूला भावेन प्राणस्य कस्यचित् प्रयत्न पूर्वकत्वेन
च ननु प्राणयोः पृथगात्मास्ति । किंच तयोः प्राणा-
द्यपि पृथगणुस्तनावस्ति स्वापे निर्भोगतः ।
बोधे भोक्तृत्वात् (बहिर्वैषयिक सुखदुःखानुभवि-
-तृत्वात् बोद्धृत्वादिति पाठेपि । भोगोत्र वेद) सुषुप्ति-
तुर्यावस्थयो रसत्यानिद्रायां निर्भोगतः शरीरे प्राण-
नाद्यौ वा स्पष्टं दृष्टे सत्यपि सुखमहं स्वाप्स मित्या-
न्तर सुखानुभूतावपि बहिर्वैषयिक सुखदुःखा-
-नुभवा भावात् । बोधे जाग्रावस्थायां सति जाग्रत्
भोक्तृत्वात् । बहिर्वैषयिक सुखदुःखानुभवितृत्वा-
-त् । बोद्धृत्वादिति पाठेपि भोगोत्र वेदना प्रोक्त
इति वचनात् । बोधे वेदनायां बोद्धृत्वा दुप भोक्तृ-
त्वात् । ननु तयो शरीर प्राण योरेव्यतरस्व-
सहकारिभूत बाह्येन्द्रिय योग वियोगाभ्यां सभोगो

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निर्भोगश्च भूत्वात्मा नान्यः तन्न तावत् देहा-
त्मवादिनां गोळकादिव्यतिरिक्तेन्द्रियासम्भवात्।
प्राणात्मवादिनां व्यतिरिक्तमपीन्द्रियं स्वविषयत्व-
सापेक्षत्वात्। ननु तर्हीन्द्रियवृन्दमेव स्वविषयत्व-
मनस्सहितमात्मा नान्यदिति लोकायतभेदाः। तन्न
तनौ सचिन्तेन्द्रियवृन्दात् पृथगणुरस्ति। अक्षोपरति-
बोधतः। अक्षाणामुपरतौ सत्यां यो बोधः स तथेति
ततोऽक्षोपरतिबोधतः। निद्रा निरुद्धशक्तिकेन्द्रिय नि-
र्व्यापारे सत्यपि निश्शेष निश्शेषतर निश्शेषतम सुषुप्ति
तुर्यतुर्यातीत निद्रासु निद्रानन्तरं सुखमहं स्वाप्सं
इति प्रत्यभिज्ञानात् तन्मूल निमनोन्मनस्सूक्ष्माव-
स्थात्म सचिन्त निश्चिन्त सप्राण निष्प्राण कलादि पञ्च-
कञ्चुक पुरुषतत्त्व कृतान्तरशरीरस्पर्श सूक्ष्म सूक्ष्मतर
सूक्ष्मतम वेदनस्यास्तित्वात् स्वप्ने निद्रायामपि
निद्रानन्तरं दुःस्वप्नोऽहं सुस्वप्नोऽहम् इति प्रत्यभिज्ञाना-
त् तन्मूल समनस्क सवासनाक विपर्यय वेदना-
स्तित्वात्। जागरेऽपि काणोऽहं बधिरोऽहं मूकोऽहं विचि-
तोऽहमित्यादि तथा विधाविध विपर्यय वेदनादपि
पुनरक्षाणामुपरतिस्तस्या अक्षोपरते बोधतः। कर्श-
नात्। कथमक्षोपरतानिन्द्रियान्तराभावादात्मनस्व-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बोधः। सत्यम्। स्वप्रकाशत्वेन स्वसंवेदनस्या-
तीन्द्रियत्वात्। स्वबोधो नेन्द्रियप्रत्यक्षः। आत्मनो-
ऽतीन्द्रियत्वात्। किन्तु स्वपरप्रकाशस्वरूपत्वात्। स्व-
संवेदनप्रत्यक्ष एव पुनर्बोधे बोद्धृत्वादिति पाठपक्षे
क्षणिकवादी बौद्धः प्रतिक्षिप्यते। स्वरसभङ्गुरं सन्ता-
156.b. नोदयं सकललोकधाम्नां निर्वाहकम् क्षणिकमेकमेव
विज्ञानं हर्षविषादाद्यनेकरूपं परिणामः। तदेवात्मे-
ति बौद्धा व्याकुर्वन्ति। तन्न क्षणिकसंवेदनस्य
परमार्थतो बोद्धृत्वात्। तन्नो स्थिरसंवेदनात्मकेनु
एव बोधे बोद्धृत्वात् तावदिदमिति निर्विकारे
तमस्तिरोहिते सत्यपि तन्नो विषयिणि सति कदाचि-
दप्यनिर्विषयिव्यवहारे देहस्पर्शिव्यक्षणिके ज्ञेय वि-
लक्षणज्ञेये परसंवेदने परसंविदर्थक्रियारूपिणी
निर्विकल्पे ज्ञाने ज्ञातारिदं जानामाहमिति बोद्धृत्वात्।
स्थिरस्वसंवेदनकर्तृत्वात् पुनरभिव्यञ्जकसम्ब-
न्धात् कदाचित्कतया चितः। क्षणिकत्वं तु नित्याया
अपि सद्यो नु भूयत इति नैष्कर्म्यश्रुतेरयं घट इति क्षणि-
कबोद्धृप्रकाशमिश्रिते बोधे परसंनिविष्टस्यार्थ-
क्रियारूपे बौद्ध सविकल्पज्ञाने बौद्धप्रकाशप्रभवप्रलय
साक्षिणि परसंवेदने बोद्धृत्वात् घटं जानामीत्यहं-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-कादिवत् सविकल्पज्ञानस्वसंवेद्यत्वकर्तृत्वात् । तद्भिन्नं क्षपणपाञ्चरात्रबौद्धवेदान्तिनैय्यायिकप्रभृतीनामभि-शकृतिरागमेषु विस्तरेति न विस्तीर्यते । तदुक्तं च मृगेन्द्रवृत्तिके : नाव्यापको न क्षणिको नैकोनापि जडा-त्मकः । नाकर्ता भिन्नचिद्योगी पाशान्ते शिवताश्रुतेः॥ आत्मानो व्यापिनो नानाचित्स्वरूपाः पशवास्थिताः। आत्मसंवित् विषयैका विवेकेन विमृश्यतामिति॥ एवं पशुपदार्थं प्रसाध्य तस्य लक्षणमाह । आत्मान्तः-करणाद्यन्यो व्यक्तितो कालिमभुवनात् । अवस्था पञ्च-कस्थस्य मलरुद्धस्वदृक्क्रियः। अत सातत्यगमन इति धातो रात्मशब्दनिष्पत्ते र्गत्यर्थधातूनां ज्ञानार्थ-त्वेकवर्तनात् सातत्येन नैरन्तर्येण गमनेन सर्वा-र्थव्याप्त्या तथाभूतेन गमनेन सर्वार्थज्ञकर्तृ शिवशक्ति-भूत शिवत्वोगीर्णस्थैर्या क्षणिक सर्वार्थ दृक्क्रियेच्छात्म-ज्ञानेन चात्मशब्दार्थस्य व्यापकत्वाभिव्यक्तत्वाच्चा-त्मा शिवतुल्यतया व्यापको नित्यश्च भूत्वा शिवः तथापि मलरुद्धस्वदृक्क्रियः मलतिरस्कृतदृगिच्छा-नन्य क्रियाकृतिः । ततोऽन्तःकरणाद्यन्योऽपि अन्तः-करणेनाप्यन्वितः । व्याप्यव्यापकव्यक्तभावसम्बन्धवान्। तादृश सम्बन्धो मलनिवृत्तिकारणम् । तदुक्तं मृगेन्द्र-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-द्धिके । नित्यव्यापकचिच्छक्तिनिधिरप्यर्थसिद्धये ।
पाशवंशाम्भवं चापि नानिबध्यत्यन्यथा बलम् ॥
तेन तेना स्वतन्त्रत्वान्नाङ्किनो मलिनीकृतः ।
यथा वस्त्रं सदोषत्वान्मलान्तस्थं निरुन्ध्यति ॥
अशुद्धः पुद्गलो ह्येवं मायोदरगतोपि सन् ।
मनोहंकारबुद्धीनां कावधानादि वृत्तिभिः ॥
अन्तःकरणता सिद्धा ततोन्यो ग्राहकः पुमान् ।
67. a. कलाद्या यातनुस्सूक्ष्मा मलपाक विधायिनी ॥
स्वभावसन्नकल्ले कृत्वा प्रयाति प्रकृत्यन्तत इति ।
कलादेरप्युपलक्षणत्वात् बहिर्ग्रान्तत्वाक्षित इत्यर्थः ॥

तथाविधस्सन् मक्षिभूपवत् बहिर्जन निरोधेना-
-न्तस्सात्त्व निरोधेन चान्तःपुरप्रविष्ट नृपतिरिव अधो-
मुखमवस्थापञ्चकस्थस्स्यात् । अवस्था विस्तार
प्रकारो निरूप्यते । तावदवस्थाः केवलावस्था
सकलावस्था शुद्धावस्था चेति तिस्रः । ततः पुनः
प्रोक्तसकलावस्था त्यागक्रमिका केवलावस्थोप-
सृष्टा अधोवस्था । केवलावस्था त्यागक्रमिका
सकलावस्थोपसृष्टा ऊर्ध्वावस्था । प्रोक्तकेवला-
-वस्था सकलावस्थोभयस्पृष्टा मध्यावस्था । मध्या-
-वस्था त्यागक्रमिका सकलावस्थोपसृष्टा प्रेरकावस्था ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रेरकावस्था प्रभृति त्यागक्रमिका सुषुप्तावस्थोपस्पृ-
-ष्टा भ्रूमध्याग्र ब्रह्मरन्ध्राग्र द्वादशान्ताग्रेषु त्रिविधा
विश्रान्ता सती स्थूल सूक्ष्म परशिवत्वाभिव्यक्तिका-
-रिका स्थूल सूक्ष्म निर्मल नामान्तर पदत्रिभेदालि-
-ङ्का निर्मलाख्यान्तर परावस्था चेति पञ्चाहत्याव-
-स्था तावदुष्ट प्रकाश भवन्ति । तत्र तावत्त्रिषु केव-
-लावस्थोपलिख्यते । विज्ञानकैवल्ये प्रलयकैवल्ये
वा नित्यनिद्राकैवल्ये वा विकर्म्म समलत्वेन सक-
-र्म्म समलत्वेन सकर्म्ममाया समलत्वेन वा
शिवतत्त्वादि स्थानीय प्रणवकला पञ्चकमूला-
-दि सूक्ष्मादि पञ्चवागुपबृंहित कलादि क्षित्यन्त -
त्रिंशत्तत्त्व राहित्ये तदुपरमेवा तूष्णीं स्थितिः केव-
-लावस्था । अथ सकलावस्थोपलिख्यते । सुषु-
-प्तसृष्ट प्रलय कैवल्ये प्रोक्त महामायोद्गीर्ण कलादि-
क्षित्यन्ततत्त्वात्मककला साहित्येन सकर्म्मक किंचिन्नि-
-र्म्मिण मलसाहित्येन प्रलयाकल केवलत्व राहित्ये
निद्राकैवल्ये कलादिक्षित्यन्त तत्त्वोपरम विरामेण
तथा निद्राकेवलत्व राहित्येन किंचित्कर्तृ सुख-
दुःख मोह सूक्ष्म विपरीत प्रतिपत्तृ भोक्तृ पुरुषत्व -
-पूर्वं सुख्यहं दुःख्यहं मोह्यहं चेति विपरीत प्रति-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-पाकृ भोक्तृ स्थूल जीवत्वम् सकलावस्थेत्युच्यते। दी-
क्षापूर्वं महामायोपात्त शुद्धकलानादिदीर्ण शुद्धकला-
साहित्येनार्थिक नादिदीर्ण शुद्ध कलादि क्षित्यन्ता-
शुद्धार्ध कला साहित्येन च विकर्तृकाल राहित्येन
विद्यावाकल केवलत्व राहित्येन सविकल्प सर्वज्ञ-
कर्तृ भोक्तृ लिङ्ग प्रेरकवत् किंचिदुक्तः पुरुषत्व पूर्वं
मलवासना भासाहमीति सुखी त्यल्प विपरीत प्रतिपत्ति-
157. b. भोक्तृ सूक्ष्म जीवत्वम् तादृश तदूर्ध्वपरजीवत्वं चापर-
-शिवत्वेन शुद्धावस्थापि कथञ्चित् सकलावस्थेत्युच्य-
-ते। अथ शुद्धावस्थोपलिख्यते। गुरुकटाक्षेण
कृत शिवदीक्षापूर्वं शुद्धशिवागम पृथक्कृत श्रुत सि-
-द्धान्त महावाक्योपदेशेन केवल सकलावस्था राहित्ये-
-न शिवमार्ग दृष्टि रसिद्ध साध्य शैविक प्रासादकला-
-न हृदन्त द्वादशान्त शुद्धमार्ग स्थितिमती तथा। सकल-
सवाख्याकल शिव गोचर तत्कालोपरतौ निष्कलनि-
-ष्कलातीत शिवगोचर तत्त्वज्ञान समाधि साक्षात्कार-
-रूपिणी शिवलक्ष प्रेषित चिच्चक्षुरुन्मीलना
शुद्धावस्थेत्युच्यते। तत्र पञ्चसु मध्ये अधोवस्थे-
-तिलिख्यते। विद्धा केवल शैविक पञ्चधागमानम-
-धोवस्था। तथाहि। स्थूल शरीरान्तर वायु प्रेरकस्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कर्म्मेन्द्रिय पञ्चकस्य वागादि कर्म्मेन्द्रियोपबृंहित
क्रिया साध्य वचनादि क्रिया पञ्चकस्य ज्ञानेन्द्रिय-
पञ्चकस्य श्रोत्रादि ज्ञानेन्द्रियोपबृंहित ज्ञानशक्ति-
साध्यज्ञान विषयशब्दादि पञ्चकस्यान्तःकरण-
चतुष्कस्य पुरुषस्य चाहत्य पञ्चत्रिंशत्तत्व तात्विका-
नामिन्द्रियाधारभूत पञ्चक तन्मूल तन्मात्र पञ्चक-
जीवनच्युतेरश्रवण श्रवणास्पर्शन स्पर्शनादर्शन-
दर्शनारसन रसनाघ्राण घ्राणं यथा तथा ललाटे
जीवनमधोवस्थायां जाग्रत्। मोक्षस्य वायुद्वादशकस्य
वचनादि पञ्चकस्य शब्दादि पञ्चकस्यान्तःकरण-
चतुष्कस्य पुरुषस्य चाहत्या पञ्चविंशति तत्व-
तात्विकानां कर्म्मेन्द्रिय पञ्चक ज्ञानेन्द्रिय पञ्च-
क जीवन~~क~~च्यवते र्ज्जा रोहणादिके बहिस्तादिति
स्थाने नाडिबिन्दुवं यथा तथा कण्ठे जीवनमधो-
वस्थायां स्वप्नम्। प्राणवायोर्मलोपस्था विशेष-
चिन्तस्य पुरुषस्य चाहत्या त्रितत्व तात्विकानां वायु-
नवक वचनादि पञ्चक शब्दादि पञ्चकान्तःकरण-
त्रय जीवनच्युतेर्विषय ज्ञानाभाव चतीय विषय-
चिन्तनं यथा तथा हृदये जीवनमधोवस्थायां सुषुप्तिः।
प्राणवायोः पुरुषस्य चाहत्य द्वितत्व तात्विकयो-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-स्थित जीवनच्युते भौत शरीरस्थादिकं यथा तथा
नाभौ जीवनमधो वस्थायां तुर्यं कुण्डस्थैकतत्त्वस्थ
प्राणवायु जीवनच्युते स्सुखनाहं स्वाप्स मित्युत्था-
नात् कथञ्चिच्च्युताच्युत नादकला विद्या जीवना-
न्तर विद्धि न्नानार देहतमो मात्र विषय परसंवेदन-
स्वसंवेदन मौढ्यं यथा तथा लिङ्गे जीवनमध्यो-
वस्था या तुर्यातीतम् । अथोद्ध्वावस्थो पलिस्यते ।

अकारे वैखरी जाता उकारे मध्यमोदिता ।
158. a मकारे पश्यन्ती जाता बिन्दौ सूक्ष्मा तथोदिता ॥
नादेति सूक्ष्मा वाक् जाता वाक्पञ्चकं कलादितम् ।
चतुर्वाचां विवक्षोत्थो कारोकारेन्च वैखरी ॥
वैखरी श्रोत्र विषया सविकल्पा तु मध्यमा ।
निर्विकल्पा त्रितीया नानासां कारणमध्यमा ॥
सूक्ष्मा चिद्रुकस्फुरणा निर्विकल्प स्वरूपिणी ।
बोधरूपा महासूक्ष्मा इति वाक् पञ्चको द्भवेति श्रुतेः ।

कलोपकृत शिवतत्त्व स्थानीयाति सूक्ष्माख्य वाक्-
प्रभव प्रणव कलाभूत नादेन मूलाधारे जीवनम् ।
मलतिरोहित बहिस्स्रक्चन्दन वनितादिक विषया-
-न्तर देहस्पर्शात्मोपाघ्रात तमो विषयपर संवेदन-
स्वसंवेदनात्मकं यथा तथा लिङ्गे जीवनम् । मलो-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-पाघ्रात मौढ्या कारिता बोधरूप मात्रोत्स्फुरत्पुरुषदर्शन-
मूर्ध्वावस्थायां तुर्यातीतम्। विद्योपकृत शक्तितत्त्व-
-स्थानीय स्वान्तर्विषदुन्मिषत्पश्यन्तीवाक् सूक्ष्माख्य
वाक्प्रभव प्रणवकलाभूत बिन्दुना नाभौ जीवनम्।
उद्रिच्यदुन्मिषन्निर्विकल्प परसंवेदन स्वसंवेदनात्म-
-कं यथा तथा मायोपाघ्रात प्राणोपकृत पुरुषदर्शन-
मूर्ध्वावस्थायां तुर्यम्। रागोपकृत सदाशिव तत्त्व-
स्थानीय स्वान्तर्विषदुन्मिषन्मध्यमावाक् पश्यन्त्या-
-रूपा वाक्प्रभव प्रणवकलाभूत मकारेण हृदये जीव-
-नं किं चिदुपाघ्रात स्वभावविषय सविकल्पाङ्कुर निर्विक-
-ल्प परसंवेदन स्वसंवेदनात्मकं यथा तथा प्रकृत्युपा-
-घ्रात मनोवस्था विशेष चित्त तत्त्वोपकृत पुरुषदर्शन-
मूर्ध्वावस्थायां सुषुप्तिः। तत्स्थाने प्राक्प्रोक्ततत्त्व-
तात्त्विकोपकृतेश्वर तत्त्वस्थानीय स्वान्तर्विषदुन्मिषद्वै-
-खरी मध्यमा वाक्प्रभव प्रणवकलाभूतोकारेण कण्ठे
जीवनं तत्कृति स्थाने इन्द्रियार्थाभास विषय सविकल्प
परसंवेदन स्वसंवेदनात्मकं यथा तथा अन्तःकरणा-
-त्मक सूक्ष्म शरीरोपाघ्राते ज्ञानशक्ति व्यञ्जक रागास्पद-
मनः क्रियाशक्ति व्यञ्जक कलास्पदाहंकार ज्ञानश-
-क्ति व्यञ्जक विद्यास्पद बुद्धि वागुन्नायक शब्दादि पञ्च-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-पञ्चक वचनादि पञ्चकोपकृत पुरुषदर्शन मूर्च्छा-
-वस्थायां स्वप्नम्। तत्स्थाने प्राक्प्रोक्त तत्त्वात्मिको-
पकृत शुद्ध विद्यातत्त्व स्थानीय वैखरी वाक्प्रभव प्रण-
-व कला भूतावरणेन ललाटे जीवनं वक्तृवैखरी वाक्-
श्रवण विकसित श्रोत्र मध्यमा वागुपकृत सविकल्प
परसंवेद्यत्व स्वसंवेद्यत्व बोधक परसंवेद्यत्व स्वसंवे-
-द्यत्वात्मकं यथा तथा बहिष्करणात्म सूक्ष्म शरीर स्थूल-
58. b -शरीरोपादान श्रोत्रादि पञ्चक वागादि पञ्चकोपकृत-
पुरुषदर्शन मूर्च्छावस्थायां जाग्रत्। अथ मध्यमाव-
-स्थोपलिख्यते। तद्वद् मूर्च्छावस्थोक्त जाग्रे प्रागनुप-
-कृत मूर्च्छावस्थोपदिष्ट पञ्च प्रपञ्चोपयोगक्रमिक
-पञ्चधा पुरुषदर्शनं यथा तथा पुराकृष्ट पुरुषविस्मृतिः।
मध्यमावस्थायां जाग्रातीतम्। दीर्घश्वासं परामृश्य
जानामीत्युद्योगः मध्यमावस्थायां जाग्रत्तुर्यम्। पुरा
पुरुष दर्शन देहमात्र प्रकाशं मध्यावस्थायां जाग्रत्-
सुषुप्तिः। पुरुष विशिष्ट देह प्रकाशः। मध्यावस्था-
-यां जाग्रत्स्वप्नम्। समन्तोवं पुरुषदर्शनालिङ्गनम्
मध्यावस्थायां जाग्रज्जाग्रत्। अथ प्रेरकावस्थोप-
-लिख्यते। वाङ्मूल प्रणव कला पञ्चक द्वारा स्थित
शिवादि शिवतत्त्व पञ्चकस्य कलाविद्यातत्त्वसत्कस्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आत्म तत्वानां मध्ये ऽन्तःकरणचतुष्टयस्य बहिष्करण-
पञ्चकोचितैकस्य तन्मात्रा पृथक्कृत भूत पञ्चकोचि-
तैकस्याहत्याष्टादशाना ऽजीवनम् प्रेरकावस्था।
तत्राप्युचित विषय कर्षण ग्रहणालिङ्गना वेशावेशो-
जाग्रा द्यवस्था पञ्चक व्यवस्था ति सूक्ष्म विवेक
विवेच नीया। तत्वमनेन कार्यमिति तत्व व्युत्पत्तिक
तत्व जीवनक्रमः प्रोल्लिख्यते। पुरुषतत्वावलीढ-
मूल सूक्ष्मा सहभूत कलया ज्ञान क्रियै भिव्यक्तापि
कथञ्चित्क्रियाधिक्येन स्वयोन्मुख स्वसंविच्छक्ति-
लक्षणेन स्वेन परोन्मुख परसंविच्छक्ति लक्षण स्व-
-मन्तरति सौक्ष्म्य महज्ज्ञानामीयाहं स्फुरण स्फुरत्तां
यथा तथा विषयी कृत्य स्व संवित्प्रभव निर्विकल्प
स्वसंवेदन ज्ञानवान् स्यात्। विन्दु मूल पश्यन्ती
सहभूत विद्यया ज्ञानाधिक्येनोद्भासित रागसह-
भूत मनः प्रेरिते न्द्रियैक कृष्ट विषय परसंवित्प्रभव-
निर्विकल्प परसंवेदन ज्ञानवान् स्यात्। तदनु तथाभूत-
रागेणेच्छाधिक्येन वक्ष्यमाण मनो वृत्त्यनुसार भूताहं-
कार परामर्श योग्यम् यथा तथा कर्णाविन्द्रिय भूत-
प्राप्त ज्ञानवान् स्यात्। तदनु रागोपबृंहित इच्छाशक्ति
व्यञ्जक प्रोक्त सविकल्पोन्मुख पश्यन्ती सहभूत रागा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-रूपत्वेना पृथक्कृत स्वावस्था विशेष चित्तत्वमयसा
वैद्येन्द्रियक प्रागुक्त ज्ञान दृष्टेनैव, पदार्थेष्वेव-
पदार्थं विकल्पैकाग्रीकृत्याहमित्यवहित पुरुषपूर्व-
मयी धर्मा वनिताया राग लावण्यैवेति सविकल्पाङ्कु-
रोत्कर्षकोटिक संकाय संस्मृति यथा तथा सङ्कल्प
विकल्प संकल्प भूत प्रागुक्त ज्ञानवान्स्यात्। तदनु
पुनरहं जानामीति गर्वविशाहं करोमीति संरम्भ-
159.a. वीजक्रमिक ज्ञान शक्ति क्रिया शक्ति व्यञ्जकावल-
-म्बे हि मर्मस्थस्य वैखरी सहभूत कलारूपाहंकारेण
गर्वेण किं विलयोऽहं बोधोऽहं परिच्छेत्स्यामीत्यभि-
मान निश्चय भूत स्वविषय प्रागुक्त ज्ञानवान्स्यात्।
तदनु ज्ञान शक्ति व्यञ्जकाकारं हि मर्मस्थस्य वैखरी
सहभूत विद्यात्मक बुद्ध्या बोधेन वनितेयमिति निश्चि-
त्य निश्चय भूत परविषय प्रागुक्त ज्ञानवान्स्यात्। तदनु
तद्वित्थं तत्काम्योपादान सूक्ष्म पञ्चक वनितादिकप्रत्यक्ष
विष सिंहनादक तद्भवत्रय विलक्षण शोषादि दर्शन-
स्पर्शनादिना अन्तर्बुद्धि सम्मुखा पूर्व संस्कार भूत-
कर्मोपादान भाव पाक भेद प्रत्ययोत्पन्न सुख दुःख-
मोह विषय बहिः प्रीत विद्या मात्र क्षणिकाया तात्कारस्य-
वसाये निपतन्विभोग निर्विकल्प विद्यातात्विक-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ज्ञानवांस्यात् । तदनु तत्सविकल्पे निमग्न सविक-
ल्पमथ निर्विकल्पज्ञानाभिव्यक्तिं सगर्वं सुखवहं
दुःखवहं मोहवहमिति तदुपेक्षावानहमिति चानुभवति।
तदित्थं भोक्तृत्वं च भोगक्रिया कर्तृत्वात्तत्पूर्वं तत्भोग-
-क्रियाभिव्यक्त्यनुभवितृत्वं चेति तत्क्रियापि भोगो-
-स्य वेदना पुंसस्सुखदुःखादि लक्षणेति श्रुतेस्त-
त्रिविधा भवति । तत्सुख दुःख मोहत्रयम् पुन-
स्त्रिविधं भवति । तदुक्तम् । अध्यात्मं द्विविधं
प्रोक्तं शारीरं मानसन्तथा । गुल्मकासातिसारैश्च
ज्वरकुष्ठाद्यनेकधा ॥ नरैर्मृगपिशाचैश्च गोपक्षि-
चोर राक्षसैः। प्रोक्तं शारीरजं दुःखं मानसं शृणु सुव्रत ॥

शोकासूयावमानेर्ष्या मात्सर्यादिभिरेव च ।
एवं मानसमाख्यातमाधि भौतिकमुच्यते ॥
शीतोष्ण वातवर्षैस्तु विद्युदशनिकादिकैः ।
एतैर्बुधैस्तु यद्दुःखमाधि दैविकमुच्यते ॥
गर्भजन्मजराज्ञानं मृत्युश्च नरकं तथेति ।

अथ शुद्धावस्थोपसृष्टा बहुप्रकारा परावस्थोपलिख्य-
ते। तत्प्रकारा सिद्धान्त सारावल्यामुक्ता।

बाह्यान्तःकरणैरणौ स्वविषयं ज्ञानन्तु जाग्रच्च तत्
स्वप्नोन्तःकरणस्थ वृत्तिविषयज्ञानं सुषुप्तिः परम्।

Center for Shaiva Studies, Pondicherry Collection

देहे देहे निद्रय वृत्तिहीन मनस्को ग्राह्यमतिस्तुर्यगम्
देहाक्षोपरतौ स्वच्छिन्नमतिरथातीतं शिवत्वोदय इति ॥

तत्र पुनरेकप्रकारः स्वान्तरितपरापरभेद शिवतत्त्व-
पञ्चकस्थानीय प्रासादकलावलंबिनी ज्ञान सिद्ध्युक्ता।

सर्वोत्पन्ना स्मृता जाग्रत्तत्स्वप्नं सर्वगोचरम् ।
सर्वात्म लयता सुषुप्तिस्तद्ध्वनमना तुर्यकल्पथा ॥

तदूर्ध्वं तुर्यकातीतत्वञ्चाहि परमोदय इति। तत्र
159. ब पुनरेकप्रकारः शिवतत्त्व पञ्चक स्थानीय सर्वकला
व्यापकाकारादि नादान्त प्रणवकला पञ्चकावलं-
बिनी क्वचिदुक्ता। क्वचित्क्वचित् बहुधा व्यवधाप्युक्ता।
पुनः प्रासादकलावलम्बिनी तदेतत्प्रणव कला-
वलम्बिनी वा प्रत्येकं, हंसादिस्व व्याप्त द्वादशान्त-
क शब्द रूढान्त पञ्चाधारक्रमेण पञ्चविंशति तत्त्व-
षट्तत्त्व मायामात्रादि मिश्रकेण तत्त्वोपाध्यात जाग्रादि
तुर्यातीतान्त पञ्चावस्थात्मिका च भवति। तत्र पुन-
रेक प्रकारः सर्वोत्पन्नेत्याद्यनुपदमेवोक्तावस्थान्त-
र्हितावभासिनी शैवादिषूक्ता ।

जाग्रज्जाग्रच्च जाग्रत्स्वप्नं तथा जाग्रत्सुषुप्तिकम् ।
जाग्रत्तुर्यं कालपरमतीतं परदर्शनम् ॥
निश्शङ्कासोपशान्तं च शिवदर्शनमेव च ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सायुज्यमिति भेदेन सोर्ध्वमेकाकृता स्मृता ॥
आत्मजाग्रं परे जाग्रं शिवजाग्रं त्रिजाग्रकम् ।
आत्म स्वप्नं परस्वप्नं शिवस्वप्नं त्रिस्वप्नकम् ॥
आत्म सुप्तिः परे सुप्ति शिव सुप्तिस्त्रि सुप्तिकम् ।
आत्म तुर्यं परे तुर्यं शिव तुर्यत्रि तुर्यकम् ॥
आत्मातुर्ये परजाग्रं शिवजाग्रत्तुर्येपरे ।
अधिकृत्य समुत्पन्नेयं स्वस्वतुर्य प्रसिद्धये ॥
एवं द्वादशधा भिन्नद्दशावस्थाः प्रकल्पिताः ।
सायुज्यं तुर्यगातीतमेकधापि त्रिलतुर्यात् ॥

ततः पञ्चदशावस्था एकादश दशास्वपि इति । पुनरेताश्च पञ्चषैकदशधा मोक्षावस्थाः पृथक्पृथक् त्रिपञ्चधाहत्य पञ्चदशधा भेदेन भिद्यन्ते । तथाहि स्वस्वसाधकस्य शिवयोगविद् भूतात्मान्तरात्म-जीवात्म तत्त्वात्म पञ्चवेषु पञ्चसु निपतस्य शिव योगेषु गुरूपदिष्ट लघु गुरु प्रकारेण शिवयोग साधक-क्रमेण कर्तव्येषु हृत्कारभ्य हृदन्तान्तो हृदारभ्य द्वादशा-न्तान्ते वा परशिवत्वाभिव्यक्त्यर्थं कृतेष्वासु प्रोक्त-मूलावस्थास्वन्तस्था हृदारभ्य भ्रूमध्यान्तान्ता जाग्रा-दि तुर्यातीतान्ता पञ्चधैकधा स्थिता स्थूल शिवत्वा-भिव्यक्तिकारी तत्रैकावस्था । पुन भ्रूमध्याद्दारभ्य

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कुण्डलिन्याग्रान्ता हृदादिषु मध्यान्ता जाग्रत्का ब्रह्मरन्ध्रा-
दि समनान्ता स्वप्नका पुनरुन्मना मूलाग्रान्तरित-
सुषुप्तिका। पुनरुन्मनान्तोपान्ता तुर्यातीत कास-
ता मूलावस्थात्मिकापि वर्तमाना तथा जाग्रदि-
तुर्यातीतान्त पञ्चधैकधा स्थिता परशिवत्वाभि-
व्यक्तिकरी तत्रैकावस्था। पुनरेतास्तिस्रस्त्रिपञ्च
धा पञ्चदशधा भेदेन भिद्यन्ते। तथा हि जाग्रज्जाग्रा-
दिकालपरान्ता सत्यात्मा जाग्रन्मात्मा तुर्यातीतान्त
पञ्चधैकधा स्थिता तत्रैकावस्था। जाग्रत्तुर्यादि-
विश्वतैजसान्ता सती परजाग्रदि परतुर्यातीता
160.a. पञ्चधैकधा स्थिता तत्रैकावस्था। परदर्शनादि
सायुज्यान्ता सती शिवजाग्रदि शिवतुर्यातीतान्ता
पञ्चधैकधा स्थिता तत्रैकावस्था। पुनरेतास्ति-
स्रः स्थूलात्म स्थूल पर स्थूल शिवेषु सूक्ष्मात्म सूक्ष्म-
पर सूक्ष्म शिवेषु परमात्म पर परपर शिवेषु नोक्तव्य-
त्वात् त्रिपञ्चधा पञ्चदशधा भेदेन भिद्यन्ते।
तदित्थं बहुप्रकारास्तिष्ठाः। पुनस्तत्र जाग्रज्जाग्रं
कार्य विश्व विश्वव्याप्त परनाम कार्य विश्वरूपात्मा-
त्म जाग्रं जाग्रत्स्वप्नम् कार्य विश्वाभिभवापर-
नाम कार्य विश्वन्तायात्मात्म स्वप्नम्। जाग्रत्सुषुप्तिः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कार्यं विश्वोपाधि विश्वाहंत्वपरनामोपशान्त्यात्म-
सुषुप्तिः। जाग्रत्तुर्यं स्वचित्प्रसत्त्वात्मकात्मतुर्यम् ।
तत्तुर्यमेव कारणविश्वव्याप्त्यपरनाम कारणविश्व-
रूपात्म परमात्मं च। कालपरं आत्मतुर्यातीतम् ।
तदेव कारणविश्वग्रासात्म परस्वरूपं च। जाग्र-
सुषुप्त्यादिकालपरान्तध्यानस्थानम्। अतीतं कारण-
विश्वोपशान्त्यात्म परसुषुप्तिः परदर्शनम्। पर-
तुर्यम्। तत्तुर्यमेव वासनाविश्वव्याप्त्यपरनाम
वासनाविश्वरूपात्म शिवात्मं च। विश्वग्रासः
परतुर्यातीतम्। तदेव वासनाविश्वग्रासात्म शिव-
स्वरूपं च। अतीतविश्वग्रासान्तं समाधिस्थानम्।
उपशान्तिः। वासनाविश्वोपशान्त्यात्म शिवसुषुप्तिः।
शिवदर्शनं शिवतुर्यं सायुज्यं शिवतुर्यातीतम् ।
उपशान्त्यादि सायुज्यान्तं साक्षात्कारस्थानम्। ब्रह्मा-
दिपरनादान्तात्मादि शिवान्तवस्तुदर्शनग्रहणा-
लिङ्गनावेशावस्थावलम्बिनी जाग्रदादि तुर्यातीतान्ता
पञ्चधैकधा स्थितापि ब्रह्मादि शिवान्तापेक्षयानेकधा
पञ्चधैकस्थिता काचिदवस्था कुशाग्रकुशलबुद्धि-
भिरूह्या। तद्विधमनेकधाप्यवस्थाशङ्कारस्वर्णाः
प्रत्याहारधारणाध्यानसमाधिसाक्षात्कारात्मना,

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जाग्रत्स्वप्न सुषुप्ति तुर्य तुर्यातीता त्रिकला शुद्धा
स्व जाग्रादि क्रमिकं पुनरशुद्धाधोवस्थादिस्थ जाग्रा-
-दि जय कारिका कथञ्चिदवस्था गृहीता भवन्ति।
तद्वित्थमवस्था प्रकारा लिखिता ।..। अज्ञोपरति
बोध इत्यादि श्रुति सिद्ध पाशपाश पदार्थयोर्म-
-ज्ञ शुद्धत्वादिति हेतो रचेतनत्वादिति हेतो रस्वा-
-तन्त्र्यात् शिवप्रेरणं विना स्वतः प्रवृत्तिर्ना-
-स्तीत्याह । विदन्त्यक्षाणि पुंसार्थानस्वयं सोपि
शम्भुना । तद्विकाशे शिवस्यैव नकान्यो बीनत्सेतन्नवेत् ॥
यद्योपबृंहित पुंशक्ति प्रेरितान्तरिन्द्रिय मनसा प्रेरिता-
-न्यक्षाणीन्द्रियाण्यर्थान् स्रक्चन्दन वनितादि पदा-
160. b र्थान् शब्दस्पर्शरूपरसगन्धविशिष्टान् विदन्ति
व्यङ्ग्य व्यञ्जक भाव सम्बन्धेन तत्पुंस प्रति बुद्धेर्वि-
निवेदयन्तीति विदन्तीत्युपचरितानि । तदुक्तं पौष्करे
दर्शयामीति कुशालोकि प्रसिद्धेरुपचारतः इति तानि
विदन्ति शानन्तीति न व्याख्येयम् । अतो तस्मात्
सोपि पुमानपि स्वयं मनसा चक्षुराद्यैर्बाह्यैरक्षद्वारार्थै-
स्संबध्य न वेत्ति । किन्तु शम्भुना प्रेरकेण संबध्य
वेत्ति । नन्वनेन शिवस्य प्रेरकत्वसिद्धे स्ततः पेर-
-णात् क्रियावेशो हि कर्तृत्वमिति श्रुतेः । शिव:

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तद्विश्वरूपं शिवशक्ति स्फुरण स्फुरणीयमिति केचि-
-द्वदन्ति तन्न घटते । तथाहि । कस्याश्चिच्छक्तेरेव
प्रत्यक्स्वसंविद्रूप शिवपरात्पर संविद्रूपं शक्तिरिति
कामिक श्रुतेः परात्परसंविद्रूपिण्यां शक्तौ न शिव-
रूपं स्फुरति परपदार्थ प्रमाणरूपिण्यामन्यस्याम्
परिस्फुरति यदि परपदार्थत्व प्रसङ्गात् । किन्तु
परसंवित्स्वसंवित् सम्बन्धीय शक्ति लक्षण स्वार्थ प्रमा-
-तृ सम्बन्धिन्यां परार्थ प्रमातृरूपिण्याम् स्वार्थ-
प्रमाणभूतायां स्वसंविद्रूपिण्याम् शिवसंज्ञितायां
शक्तौ परसंविद्रूपं शिवरूपमप्रमेयत्वेन प्रमातृ-
161.a -त्वेन स्वेन परिस्फुरति । तथाविनेति नो मान्यम्
परकीय स्वसंवित्प्रमाणे परिस्फुरति यदि नचात्-
-मशिव प्रमिति ज्ञानमित्य प्रयोजनत्वात् । तथात्वे
पुनरैकात्म्य प्रसङ्गाच्च । ततश्शिवशक्त्योरैकात्म्य-
-सिद्धौ शिवरूप प्रमाणभूतायां परिस्फुरति यथात्म-
-नः प्रयोजनमस्ति । बुद्ध्यादिसद्भावज्ञानिनः विदुः
जानन्ति । न कुङ्कुमं सत्यमिति किन्तु दृश्यमपि सत्यं
दृष्टं यदिदं सत्यं प्रपञ्चपृथक्तामन्यानां वेदान्तिनाम्
पारमार्थिकवार्तामात्रा पारमार्थिक दृष्टिमात्रस्या सत्य-
-मिति न सिद्धान्तिनां स्वरूपतः पारमार्थिकदृष्टे-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विकारी योह्यादि हस्तचालनादि व्यापारवानित्यु-
च्यते । तन्न । कालो योऽनत्यस्तन्नयेत् । सः शिवः तं
पुमांसम् । कालतो योवत् नयेत् प्रेरयेत् । न हि
शिवस्य क्रियावेशः कर्तृत्वं किन्तु जडरूपनदुक्रिया-
यां याशक्तिस्सा कर्तृता चितः । व्याहतरूपनदु रूपेण
सिद्धाबल्कानवन्स्वतः ॥ इति । तदिदं प्रथमसूत्रे कर्तृ
साधने प्रपञ्चितमिति नात्र विस्तीर्यते । पुंसि प्रव-
रत्वाततन्त्रय दुर्शनादि त्यनुमानात् शिवः प्रेरकत्वेना-
नुमीयमानो व्यापकेनानन्यमानोऽपि योनि प्रत्यक्षेण
दृश्यमानोऽपि भेयत्वेन ज्ञातृ विलक्षणात् जडिमानु-
विद्धो भवेदित्याशङ्क्याह । अदृश्य स्येतु सम्भावो दृश्यस्ये-
वजडिमाभवेत् । शंभोस्तद्व्यतिरेकेण रूपं नेयं विदुर्बुधाः ।
शम्भोरूपं शिवत्वात्मकं लक्षणम् । अदृश्यं येत्
तस्य शशविषाणवदसत्भावत्यात् । दृश्यं चेत्
तत्र दृश्यत्वं तत्रान्येतनत्वमिति व्याप्तिस्तस्य जडिमा-
भवेत् । अचेतनत्वं स्यात् । तर्हि कथं ज्ञेयं तद्व्यति-
रेकेण दृश्यादृश्य विलक्षणेन सर्वज्ञकर्तृत्वरूप द्वक्-
शक्तिरूपेण प्रकाश्यत्व विलक्षणेन प्रकाशकत्व-
रूपेण ज्ञेय स्वीपरूपमिव व्यञ्जकं शिवशक्तिव्यक्त-
चिद्व्यक्तिस्फुरण स्फुरितत्वा ज्ञेयं स्फुरणीयम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-रसत्वं सत्यमेव । तदिदं प्रथम सूत्रे कर्तृसाधने
प्रपञ्चितमिति नात्र विस्तीर्यते । प्रपञ्चशिवौ
स्वस्वार्थं परस्परञ्च जानीत इत्याह । नचिच्चित्स-
-न्निधौ वेत्ति न विन्तस्ते उभे मिथः । प्रपञ्च शिव-
-योर्वेत्ता यस्स आत्मा तयोः पृथक् ॥ चित्सन्निधौ
शिवसन्निधाने शिवोपकृतः अचित्प्रपञ्चः ।
स्वार्थं परार्थं वा स्वात्मानञ्च वेत्ति । स्वसंवेदन
राहित्यात् । ते उभे चिदचितौ शिवप्रपञ्चौ मिथः
परस्परञ्च विन्तः । न जानीतः । तत्र अचित्प्रपञ्च-
-शिवोपकृतः पुनरनुपकृतो वा चिदं शिवं स्वार्थं
स्वकर्तृत्वेन स्वभोग्यत्वेन वा स्वभोजयितृत्वेन
वा परार्थं परकर्तृत्वेन परभोग्यत्वेन वा परभो-
जयितृत्वेन वा स्वरूपमात्रेण वा न वेत्ति परसंवेदन
राहित्यात् तत्र चित् शिवः अचितं प्रपञ्चं स्वात्म-
-नि स्वतस्सिद्ध स्वार्थत्वात् सिद्धस्य कृतेतरस्सम्भ-
-वात् स्वार्थमन्तरापि स्वापेक्षाया तथा कृप स्वभाव-
-त्वात् तूष्णीं स्वरूपमात्रेण पश्यतीति परार्थं
स्वरूपमात्रेण न पश्यति परार्थं पञ्चकृत्यात्म
स्वकार्यत्वेन परभोग्यत्वेन च वेत्तीति स्वार्थं
पञ्चकृत्यात्म स्वभावत्वेन स्वकार्यत्वेन स्वभो-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-ग्यत्वेन च न वेत्ति । मुक्तात्मापि तथा वेत्ति । तथा
न वेत्ति च । न च सर्वथा वेत्तीति व्याहन्येयम् ।
अज्ञातस्य करणासम्भवात् । प्रथमसूत्रादिके
सदृशैतत् सम्भवत्यस्मात् प्रभुर्हर इत्यादि श्रुति विरो-
धात् । ततः क्रमेण भोगमोक्षस्वार्थ सिद्ध्यर्थं प्रपञ्च-
शिवयोर्वेत्ता पुनरपेक्षिता यस्य आत्मा तयोः प्रपञ्च-
शिवयोः पृथगन्यः । तदुक्तं मृगेन्द्रे —:

नित्यव्यापकचिद्व्यक्तिविधिस्स्वार्थसिद्धये ।
पाशवांशं भवं चापि नाधिष्ठात्यन्यथा बलम् ॥
कार्यं क्षित्यादि कर्तेशस्तत्कर्तुर्नोपयुज्यते ।
पारिशेष्यात्परार्थत्वं क्षेत्रज्ञस्य परस्तयोरिति ॥

अन्यथा बालो नाधिष्ठितेत्यर्थः । किञ्चित्वस-
मर्थपादः । ततस्सर्वोपाकीयते । इत्थमनुमाना-
161. b. गमाभ्यां शिवं परोक्षं बुध्वा पुनश्शिवस्य दर्शनं
ज्ञानम् योगस्तत्रैव चित्ततेति श्रुतेः । गुरुकटाक्षेणा-
दृढयोगात्मध्यानसमाधिपूर्वं सर्वार्थभासकं ज्ञानं
शिवयोगजन्यं शाश्वतमिति श्रुतेः दृढयोगात्म साक्षा-
त्कारार्थ क्रियाकरणयोगात्म प्रत्यक्ष शिवशक्ति-
व्यक्तचिद्व्यक्ति लक्षणन्दिव्यचक्षुषा स सर्वार्थं शिवं
स्वात्मानं च साक्षात्पश्यतीत्याह । स्थित्वा सेहविद्ध्र-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-ध्यायैः स्वात्मानं वेत्सीति बोधितः । फलितान् गुरुणा-
-नन्यो धन्यः प्राप्नोति तत्पदम् ॥ वन किराते-
-र्विजातीय दुराचारैः सह स्थित्वा सम्भवाय तदुराचार-
वासनावेशेन किरातोऽहमिति स्वात्मानं वेत्सि राजात्मजमसी-
-ति बोधित राजकुमारवत् । इन्द्रियव्याधैः मोक्ष-
सुमार्ग प्रतिबन्धक भोगकुमार्ग प्रवेशक दुराचारैः-
स्वदुरहङ्कारादिभिः सह स्थित्वा सम्भवाय तदुरा-
-चार वासनावेशेन देहोऽहमहङ्कारोऽहमिति प्रमुख-
बुद्ध्या स्वात्मानं वेत्सि त्वमसीति गुरुमुखात् दुरुप-
लभ्यमान सिद्धान्त महावाक्योपलक्षक वेदान्त महा-
वाक्येन गुरुणा बोधितो ज्ञापितो जीवस्वमूलैः सह-
तैतान् व्याधान् मुक्त्वा सालम्ब शिवयोगोत्कलित वि-
-वेकेन कथञ्चित् त्यक्त्वा विहाय तद्सामर्थ्यैः केवलेन
निर्विकल्पना मुक्तानिव विविक्त्य वाच्यार्थ निर्मुक्त-
निरुपाधिक ध्यान भूमि भूतत्वम् पदलक्ष्यार्थात्मा
सन् पुनरन्यस्सोऽहमसौ त्युपलक्षित शिवस्वभाव-
भाव सन् पुनर्धन्यः ध्यानोत्कर्ष वपुष्मत्समाधिमान् ।
तत्पद तदुपलक्षित वाच्यार्थ निर्मुक्त निरुपाधिक
समाधि भूमिभूत शिवपद लक्ष्यार्थं परं प्राप्नोति ।
वाच्यार्थ निर्मुक्त निरुपाधिक साक्षात्कार भूमि-

Center for Shaiva Studies, Pondicherry Collection

-भूतासि पदलक्ष्यार्थो जीवपरैक्य भावितो भवति।
ननु तदित्थं ज्ञानयोगाभ्यां मोक्षसिद्धौ दीक्षा व्यर्था।
तन्न। दीक्षादि चतुष्टयादेव सिद्धि मुक्ती। तदुक्तं सा-
-तद्धे। सदाशिव पदं योगात् चर्यया नाथ दीक्षया।
प्राप्यते चित्तभेदेन मोक्षो नाथ चतुष्टयादिति॥
तदेतत् ग्रन्थेपि नाशङ्क्य समुच्चयार्थो न तु वि-
-कल्पार्थ इति समुच्चिता दीक्षादि चतुष्टयादेव
सिद्धि मुक्ती। नैकतरस्मादिति श्रीरामकण्ठ गुरु-
-वर्येण व्याख्यातम्। तत्र चित्तभेदेनेति दीक्षादि-
-त्रयोपबृंहित विविध भुवनेश्वर मात्र ज्ञान भेदाभि-
-स्सदाशिवपदादि विविध सिद्धयो भवन्तीति च।
दीक्षादित्रयोपबृंहित सर्व्वकर्म्म क्षयकर त्रिपदार्थ-
-ज्ञान पूर्व शिवत्वापादक सोपान्तर विषय दीक्षा-
162. a -योगाद्भूत ज्ञानेन ज्ञानेन मुक्ति रित्यप्यर्थः। ननु
निराधार शिवकृत सद्यस्सिद्धि मुक्ति प्रद सद्यो भोग-
निर्वाण दीक्षायां गुरुकृत तथाविध सद्यो भोगनि-
-र्वाण दीक्षायां च दीक्षानन्तर दीक्षितानुष्ठेय ज्ञान-
-योग स्वान्तर्हित क्रियावच्चर्यानुष्ठानानामनवकाशात्।
गुरुकृत निर्बीज दीक्षायां च यथाशक्ति यथायोगं
पूजादिकं गुरु शुश्रूषामात्रं वा कुर्यान्नाकुर्याद्वा

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कार्ये द्रुत्युक्तत्वाच्च कथं दीक्षादि चानुष्ठानेन
सिद्धिमुक्तीत्युक्तम् । सत्यम् । तत्रापि दीक्षितव्यमु-
-द्दिश्य सर्वस्य संकल्पमात्रतत्संकल्प सहकृताहुति दान-
क्रमिक शिवाधिष्ठिताचार्यानुष्ठित ज्ञानयोगान्ता-
-न्तर्हित क्रियानुचर्यात्मत्वद्वद्विनी दीक्षैव मोक्षका-
-रिणी ननु ज्ञानमात्रम् । सा च दीक्षा तावद्द्विविधा
वरुण पद्धत्याम् :

स्वः कुण्डवती हौत्री साद्विभेदा निलोदिता ।
क्रमात्सा द्विविधैवं दीक्षा तन्त्रैरिहोच्यते ॥
ज्ञानवती भवत्येका क्रियावत्यपरा स्मृता ।
विनेज्याबल कर्मादि मनोव्यापारमात्रतः ॥
दीक्षा ज्ञानवती प्रोक्ता सम्यक्तत्त्वावबोधिका ।
इज्याबलवती या तु क्रियाकौशल सम्भवा ॥

द्विविधास्थित दीक्षापि पुनस्त्रिविधा भवति । तत्र
ज्ञानवती द्विविधा । क्रियावती चैका । तदुक्तं वामदे-

शाम्भवी चैव शाक्तीच मान्त्री चेति शिवागमे ।
दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना ॥
मूर्धादि पादुसीमाध्व दिव्य दृष्टि निरीक्षणात् ।
नखाग्राद्दृकिका यावत् कलास्थाध्व निरीक्षणात् ॥
कला प्रतिष्ठा विलयौ करोति गुरुरीदृशा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

गुरोरालोकमात्रेण स्पर्शनात् भाषणादपि ॥
सद्य स्सञ्जायते ज्ञान दीक्षाख्यं शिवशक्तिचित् ।
शाम्भवी सा मुक्तिकरी योजनालोकबोधिता ॥
नादुण्य व्यक्तिकर्त्री च सा दीक्षा शाम्भवी मता ।
शाक्ती भावनवती दीक्षा शिष्यदेहं प्रविश्य तु ॥
गुरुणा योगमार्गेण क्रियते ज्ञानचक्षुषा ।
मनसा वस्तुसंस्कारः क्रियते योगवर्त्मना ॥
उद्घातैः पञ्चभिश्चैव चतुर्भिस्त्रिभिरेव च ।
कुम्भयोगेन चात्मानं हृदये सन्निरुध्य तान् ॥
हृदादिस्थानिनवृत्त्यादीन् पाशान्संशोध्य च क्रमात् ।
मुक्तात्मानं समुद्धृत्य सर्वज्ञादिगुणोदये ॥
विषुवत्संप्रयोगेण योजयेद्ध्रुवते पदे ।
शाक्तीयं योगदीक्षेति क्वचिदुक्ता च तत्वतः ॥
मान्त्री क्रियावती दीक्षा कुण्डमण्डलपूर्विका ।
साकापि बहुधा प्रोक्ता सबीजादिविभेदतः ॥

पुनश्शाक्ती वा शाम्भवी वा मान्त्रीत्युक्तायाः क्वचित्
सन्दिग्ध वैकल्यायाः कस्याश्चित्क्रिया दीक्षायाः
अङ्गत्वेन मन्त्रक्रिया भावना वैकल्य परिहाराय
गुरुपादपूजा पूर्वं-ज्वाहदजहल्लक्षणया हेयोपादेयेषु
722.b. पृथक्पृथगेकैकं पञ्चकला गर्भ पञ्च प्रकार.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पञ्चमार्गेषु भूतात्म शिवात्मात्मशिवतत्त्वा-
-त्म शिवजीवात्म शिवमन्त्रात्म शिवेषु संक्षिप्य
तत्त्वनिष्ठात्मेति शिव इति पुनरेकप्रकारेषु वा
पृथक्पृथक्तद्रूपलक्षित तदुपबृंहित पञ्चकलात्म
शिवेषु वा संक्षिप्य कलात्म शिवेषु वा कृतदृष्टा-
कार्यक्रमेण सप्रसादमहामन्त्रं सहमार्गसालम्ब-
शिवयोगादुत्क्षिप्य कर्तव्य सन्मार्गज्ञानाख्य निरा-
लम्बशिवयोगोपदेशाय च कर्तव्या। तदुक्तम्
श्रीमच्चिन्त्यविश्वसादाख्ये –:

एवमादिक्रिया दीक्षा सम्पन्नो गुणसत्तमः ।
स एव योगदीक्षायामधिकारी च नान्यथा ॥
पूर्वं दीक्षा समायुक्त शिष्याणां मुक्तमानतथा ।
आणवं शक्तिसम्भूतं शाम्भवं त्रिविधं भवेत् ॥
शाक्तं शाम्भव दीक्षा च क्रियते तत्त्वया मया ।
अन्यैराणव दीक्षा तु मन्त्रतीर्थादि भेदतः ॥ इति ॥

तथापि श्वात्मा कृतिरिति सामान्यशास्त्रकमुपवृता-
-नां वर्गोष्ठि रीते स्वयोक्तं पुनरन्तरव्याभिचार सह-
-कारितया प्रोक्त त्रिदीक्षात्मना पृथक् पृथक् प्रवृत्ता-
-नां क्रियाशक्ति तत्क्रियाशक्ति विश्लेषदृशक्ति-
तत्क्रियाशक्ति विशेष दिव्य चक्षुर्ज्ञान शक्तीनां क्रमिव

Center for Shaiva Studies, Pondicherry Collection

वृत्तीनां ज्ञात्वा कृतिरिति सामान्य ज्ञानोपकृतानां
वरगोष्ठि वीतिरन्योन्यं पुनरन्तर व्यभिचार सहकृति-
-तया तत्तिदीक्षात्म त्रिशक्ति निवृत्यात्मना प्रवृत्तानाम्
विषन्निकृन्ततीव मल निकृन्तदुग्र संरंभ क्रिया त-
-त्क्रिया विशेष तादृगुग्र संक्षुब्धी तत्क्रिया विशेष-
तादृगुग्रालोक ज्ञानानां शुक्तिवा तथा तथा विवक्षि-
-तत्रुट् त्रिशक्ति निवृत्तीनां शक्ति शूलासु गुरोरसवा चित्
प्राकृत कायिक मानसिक चाक्षुष दिव्य क्रियात्मि-
-कासु क्रमेण आणवी शाक्ती शाम्भवीति त्रिनाम-
त्रिदीक्षासु वरगोष्ठि यीति रन्योन्यं पुनरन्तरव्यभि-
-चार सहकारिणीषु सतीषु पृथक्पृथक्कर्तव्यत्वेन
स्वातन्त्र्येण प्रवृत्तासु पक्वमले शिष्ये (त्यक्ता विविक्तेन)
मन्त्रक्रिय । भावना साकल्यकरण निपुणेन गुरु-
-णा आणवी दीक्षा कर्तव्येति पुनरपि पक्वमले त्यक्तयोग्य
-त्यक्त कुरिदृवा शिष्ये त्यक्त विविक्तेन योगाभ्यास निपुणेन
नन्दिकेश्वरं प्रति क्रियते तत्त्वया मयेति शिवेनोक्त-
-त्वाद्भिन्न तुल्य स्वस्वरूप शिव भावना पूर्वं समारो-
-पित शिवाद्वैत शिव स्वरूप भावनो कर्षो त्कर्षेण पुन-
-रतः प्रत्यक्षीकृत शिवादि वस्तुना गुरुणा शाक्ती वा
शाम्भवी वा श्रीमन्त्रिशति द्विशतिकालोत्तर त्रिवत्य -

विश्वादिषु दर्शित प्राक्प्रोक्त प्रकारेण कर्तव्येति
163.a तथा तिसृषु दीक्षासु कर्तव्यासु स्थितासु तासु तिसृषु
दीक्षासु विद्यमानासु ऋजुकायः किञ्चिद्विवृत
वक्त्रः खस्थ दन्ताग्रस्थाग्रजिह्वः किञ्चित्कुञ्चित-
नेत्र इति दिव्यकरणाख्य दिव्यमुद्रा मुद्रित बहि-
-र्गृहीत मनश्चक्षुरुपबृंहित वपु रन्तरिडा पिङ्गळा-
पिधान प्रसारिताधोमुख वक्त्र सुषुम्नान्तरित मनो-
-न्तरुन्मनन क्रियान्तरङ्गानुस्मृती ध्वान्तरङ्गालोक-
शानात्मिकासु सतीषु शिवशक्ति व्याप्ति भूमिभूत-
-गुरुशक्ति समुत्तीर्णासु योजनासु वरगोष्ठि वीतरथ्यो-
-र्व्यं पुनरनल्प व्याभिचारिणीषु सतीषु विषुवत्
संप्रयोगेण योजये ध्रुवके पदे इति श्रुतेस्समुच्चारित-
प्रासाद महामन्त्र सहितासु कर्तव्यासु स्थितासु तत्र
मान्त्र दीक्षायां शाक्त दीक्षा शाम्भव दीक्षा चान्तर्भवति।
शाक्त दीक्षायां मान्त्र दीक्षा शाम्भवी दीक्षा चान्तर्भवति।

तत्र शाम्भव दीक्षा समाप्ति समनन्तरं गुरुस्वपादुकपूजां
कारयित्वा शिष्य मूर्ध्नि शिवहस्तं विधाय प्रासाद
महामन्त्रोपदेश पूर्वं प्रोक्त बहुशकार्य क्रमेण शिवभोग प्रदं
शिवयोगमुपदिशेत्। शाक्त दीक्षा समाप्ति समनन्तरं
मान्त्र दीक्षा समाप्ति समनन्तरं च आसने समुपविश्य

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रासाद महामन्त्र मूल प्रकारमुच्चरन् कालपाशलयं
यथा तथालोक्य तथैव योजनां च विधाय संक्षिप्य
शाम्भव दीक्षां समाप्य यथाशक्ति स्वपाद पूजनं कारयित्वा
शिष्यमूर्ध्नि शिवहस्तं विधाय प्रासाद महामन्त्रोप-
-देश पूर्वं प्रोक्तवद्दशकार्य क्रमेण शिव भोगप्रदं शिव-
योग मुपदिशेत् । तदेतासु तिसृषु मान्त्रशाक्तशाम्भव-
दीक्षासु तदनन्तर मनुष्ठेयमनुष्ठेयभावेषु शिवागम-
श्रवण मनन जनित ज्ञानोपकृत ध्यान तदुपकृत समाधि
तदुपकृत जीवन्मुक्ति साक्षात्कारेषु च यथाविहितानुक्रमेण
अभिव्यक्ता पुनस्तदन्ते निरधिकरण दीक्षायां च साक्षा-
-दभिव्यक्ता च तत्तद्दीक्षा ज्ञानादि संज्ञिका सती परमुक्ति
तदानन्तर्येण परमुक्ति साक्षात्कार परनाम शिवत्वाभि-
व्यक्ति कर्त्री सती शिवशक्ति मुख्य वृत्त्या दीक्षोच्यते ।
प्रोक्त गुरुशिष्य करणीय प्राकृत कायिकादि वाचिक-
मानसिकादि क्रियात्म मान्त्र दीक्षा प्रमुख दीक्षादि जीव-
न्मुक्ति साक्षात्कारान्ताः पुनरङ्गादि रूपा दीक्षाः शिव-
शक्ति लक्षण दीक्षाभिव्यक्ति भूमित्वात् गौणवृत्त्या
दीक्षा प्रोच्यते । तत्र शिवशक्तिरेव दीयते ज्ञानसद्भावं
क्षीयते च मलत्रयम् । दानक्षपण धर्मित्वा दीक्षा
शब्द इहोच्यते । इत्यभिनिर्दिष्टा दीक्षा । तदुक्तमन्यत्रा-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

स्तव सकलजनन्योः :

अन्तोऽपश्चिमतनोरसति कर्कशे सान्द्रे
निःशेषपाशपटलच्छिदुरा निमेषात् ।
कल्याणदैशिककटाक्षसमाश्रयेण
कारुण्यतो भवसि शाम्भववेधदीक्षा ॥

163. 6. शिवस्त्वं शक्तिस्त्वमसि समया त्वं समयिनी
त्वमात्मा त्वं दीक्षा त्वमिव मणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमिदमखिलं किं चिदपरम्
पृथक्कृत्तः किञ्चित् भगवति न वीक्षामह इमे इति ॥

तत्र शाम्भवदीक्षाकृत स्वान्तर्हित पाशक्षपण क्रियाव-द्गोलोकस्यापि पत्नशोषक स्वान्तर्हित शोषण हिमवत् पुनस्तैलशोषक सोष्ण दीपप्रकाशवदुक्तदृष्टान्तेन बहिर्हितान्तर्हित क्रियात्मिकानां मान्त्री शाक्ती शाम्भवी-ति त्रिदीक्षाणां पाशच्छिदुरशीलत्व क्रियात्वात् त्रि-दीक्षानन्तरकरणीय शिवागमश्रवण मनन जनित दीक्षा-योगाद् सामान्यज्ञानोपकृत शिवशक्ति निमित्त दीक्षित-तिबुद्धि समुत्थ दीक्षात्म शिवशक्ति भूमि भूतस्वान्त-र्हित क्रियावद्दिदृक्षात्मध्यान तदुत्कर्षावस्थात्म समा-धि तदुत्तीर्ण स्वान्तर्हित क्रियावत् सन्देह साक्षात्कार दीक्षाद् दीक्षाणां पाशच्छिदुरशीलत्व क्रियात्वाच्च

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मलस्य द्रव्यत्वान्न सामान्य ज्ञान मात्रान्निवृत्ति-
-रिति सिद्धान्तितत्वाच्च दीक्षाफल परमुक्ति साक्षात्का-
-रोदयात्म ~~ज्ञान तदुत्कर्षावस्थात्म समाधि तदुद्भीर्ण-~~
~~रूपात्वाहितो क्रियावत्येव साक्षात्कार दीक्षाद्, दीक्षाणां~~
शिवत्वाभिव्यक्तेरपि दृक्क्रियोभयात्मकत्वाच्च
शिव शक्ति क्रियाशक्ति लक्षण दीक्षा कर्म्मणैव मोक्षः।
न ज्ञान कोटिमात्रेण। तदुक्तम्। रत्नत्रये। पौष्करे
चाथत्रच्च। तथा परीक्षिता संविदागमैः सोपपत्तिभिः।
निवर्त्तमाना जातेति नश्यति विविधेति च ॥
ज्ञानादि वर्त्यं गमयेत् कारण तिमिरादिवत् ।
तद्धिव प्रणिधानेन शिवशास्त्रोदितेन च ॥
कर्म्मणैव निवर्त्येत नान्यथा ज्ञान कोटिभिः ।
तिमिरादिर्यथाशेनस्य शास्त्रोक्तेनैव कर्म्मणा ॥
तच्चाद्द्रव्यं यतः कर्म्म निवर्त्यं पटलादिवत् ।
किं च द्रव्यं मलोनेकशक्तिमत्वाद्यथानलः ॥
न क्रिया रहितं ज्ञानन्नज्ञान रहिता क्रिया ।
अपश्यन्नन्धको दग्धः पश्यन् पङ्गुश्च दह्यते ॥
तस्य तेन तदुभयत्वा दीक्षा सातोद्भिनी भवेत् ।
शिव दीक्षां तु मुक्त्येकां सर्वत्राव्याहतां पराम् ॥
ज्ञानतो योगतश्चैव चर्यातश्च न मुच्यते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दीक्षयैवात्र मुक्तिर्हि सर्वेषां प्राणिनामिह ॥
ज्ञानादीनान्तु सामर्थ्यं तत्रापि स्वल्पविद्यते ।
बाल बालिश वृद्धस्त्री भोगिनां सरुजान्तथा ॥
ज्ञानादिभिर्न्न मोक्षोऽस्ति तस्माद्दीक्षैव मोचिनी ।
श्रीनिश्वास कारिकायाम् :-
स्नानेन निर्म्मले वस्त्रे जपात्सिद्धिर्न संशयः ।
पूजया सन्निधिस्त्वेव होमश्चैव फलप्रदः ॥
ध्यानेन सर्वगन्देवम् योगे योगित्वमाप्नुयात् ।
व्रतेन कायशुद्धिः स्या दीक्षया मुक्तिरिष्यते ॥
षट्सहस्रिकायाम् :-
164. a. दीक्षया श्रवणे योग्यो दीक्षया पूजने क्षमः ।
दीक्षया प्राप्यते ज्ञानन्दीक्षया सिद्धिभाक् भवेत् ॥
काशीखण्डे :- यथा द्रोणी विहीना हि तर्तुमिच्छन्ति सागरम् ।
अध्वशुद्धि विहीनो हि तथा मुक्तिं समीहते ॥
स्कान्दे :- नात्राश्रमकृतः कश्चिदुत्कर्षो विद्यते नृणाम् ।
परान्दीक्षां विना शैवीं बन्धत्रय विमोचिनीम् ॥
तस्मान्मुक्तिर्दीक्षयैव नाश्रमैर्न्नान्यकर्म्मभिः ।
श्री चिन्त्यविश्वे :- तत्कृतोच्युक्त मार्गेण मलानां
वर्द्धनाय वै । तस्माद् वैदिक मार्गेण मलनाशो न
विद्यते ॥ शैवागमोक्त मार्गेण दीक्षया मोक्ष एव हि ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इति। केचित्तु द्वैतवासनावासिताशैवाचार्या न हि
मलो द्रव्यं गुणभूतमज्ञानमेवाज्ञानस्य सर्पदेहाभि-
व्यक्तिः सर्पकञ्चुकमुक्तिवत् शिवसाक्षात्कारेद्धा
विलम्बेन कालेन मुक्तिः। न मुक्तेरनन्तरं व्यक्ति-
लक्षणः साक्षात्कारः। तत्साक्षात्कार एव मुक्तिसाध-
नमिति प्रलपन्ति। तदयुक्तम्। तथा हि। किं च द्रव्यं
मलो नैव शक्तिमत्वाद्यथा नलः। इत्यादिभिर्मलो द्रव्यं
नाज्ञानमिति प्रागेव साधितत्वेन सर्पकञ्चुकवद्द्रव्य-
त्वसिद्धिः। पुनस्साक्षात्कारः कीदृग्रूपोऽभिमतः।
पुनरस्माभिरभिमतश्चित्प्रत्यक्षसर्वार्थज्ञानक्रिया-
रूपम्। पाशाभिभाविका शक्तिस्सद्धा नान्दक्रिया-
भिधेति श्रुतेः। सामान्यसर्वार्थज्ञानक्रियावत्त्वलक्षण-
परमात्म पशुत्व पाशत्वाभिभावयोग्यक्रियाविशेषा-
लोकरूपं मुक्तशिवशक्तिप्रमाणनिष्ठमनभिप्रेत्य
युष्माभिरसामान्यज्ञानमात्रस्यापि व्यधिकरणशिव-
शक्तिप्रमाणनिष्ठो मुक्तशिवप्रमातृसाक्ष्य प्रमित-
रूप इत्यभिप्रेतः। तस्माद्द्रव्यात्मकोमलस्सामान्यज्ञान-
रूपात् साक्षात्कारान्न निवर्त्यते। किं च सर्पकञ्चुक-
सर्पदेहाभिव्यक्त्योरसौ कृत्यपौर्वापर्योपचारित समान-
कालीनत्वात्। परमार्थतस्सर्पकञ्चुकमुक्तिः।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्राथमिका स्वदेहाभिव्यक्तिः। पाश्चात्या यथा
तथा मलमुक्ति शिवत्वाभिव्यक्तिलक्षण साक्षात्कार-
-द्वयानन्तर्य सिद्धेः पूर्व भावित्वा सिद्धेश्च मलमुक्तिं
प्रत्यकारणत्वम्। किन्तु मलमुक्तिं प्रति शिवत्वाभि-
व्यक्तिं प्रति च शिवशक्ति लक्षण दीक्षाया एव कारणत्वम्।
यथैव मैतयोः परमुक्ति परशिवत्वाभिव्यक्त्योर्जीव-
-न्मुक्ति साक्षात्कारं प्रत्यानन्तर्यात्तयोस्साक्षात्कारः
कारणमस्तु। तथास्तु नास्माकं विरोधः। तदुक्तं
च। योगाभ्यासनतः कृत्वा ज्ञानन्तत्र तदाश्रयेत्।
तदाज्ञानान्धकारं च ज्ञानदीपेन नाशयेत् ॥
स्वभावशुद्धं नन्वात्मा न स्वभावस्तु तन्मलम्।
श्यामनीलादि सम्बन्धे स्फटिकत्वाद्धदेव हि ॥
त्यक्तोनाति प्रयत्नेन शुद्धस्फटिकभावहेद्धिति।
तथापि जीवन्मुक्तिं प्रति व्यक्तिलक्षण जीवन्मुक्ति-
64.6 -साक्षात्कारे न कारणम्। किन्तु तयोस्समाधि-
-रेव कारणमिति संक्षेपः। ननु मलमुक्तेरनन्तरं
झटिति सौक्ष्म्योपलक्षित पौर्वापर्योपचरित व्यक्ति-
समानकालीनत्वस्त्व मुक्तिकल्पा दुःसनायाः वासना
मुक्ति शिवत्वाभिव्यक्तिमध्ये विद्यमान वासनाकृता-
ज्ञान मुक्ति शिवत्वाभिव्यक्त्योरेककालीनत्वमस्तु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तथास्तु वासनाकृत शिवत्वव्यक्तिवृत्तिज्ञानाभावलक्ष-
णाज्ञानस्य घटादि प्रागभावैरिव घटादिकारणे मृ-
द्वादौ वस्तुभूतस्थितिरिव शिवत्वलक्षणज्ञानकारणे
शिवत्ववृत्तिज्ञानप्रागभावत्वेन स्थितिर्नोपपद्यते।
व्यधिकरणमलनिष्ठत्वेन यथास्थितिस्थास्नुबुद्धि-
गतवृत्तिव्यक्तित्वेन निष्प्रागभावत्वात्। ततो मलो-
पाधिकृत प्रागभावतदुपचरितज्ञानाभावात्मका
ज्ञानस्यावस्तुत्वात् शिवत्वाभिव्यक्तेरेवाज्ञानमुक्ति-
र्न वस्त्वन्तरमिति तस्य तुच्छत्वात्। तुच्छस्य मुक्ति-
र्निरस्त समुक्तिरिति कथञ्चतुर्थकालीनत्वम्। मुक्ते-
र्वस्तुभूतमलमलवासनान्तमात्रे पर्यवसितत्वात्।
ननु दीपप्रकाशान्धकारनिवृत्त्योरिव मलनिवृत्ति-
शिवत्वाभिव्यक्ती सामान्यज्ञानसाक्षात्कारमात्रात्
समानकालीने स्याताम् । तन्न। तत्रापि दृष्टान्ते पर-
मुक्तिं प्रति वैपरीत्य वैषम्यात् जीवन्मुक्तिं प्रति तथा-
त्वात्। सौक्ष्म्य पौर्वापर्य प्रसरण निरसन क्रियायो-
स्सक्तत्वात्। मलात्मशक्त्योर्निरुद्ध प्रकटीकृतत्वा-
भिन्नकालीनत्वं विश्लिष्टत्वं चेति सन्तोष्टव्यम्।
तत्पदन्तु शिकारं स्यात् द्वाकारं त्वं पदं भवेत् ॥
असिपदं यकारं स्यादित्येवं वाक्यनिर्णयः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इत्यागमात्तथा शुद्धं पञ्चाक्षरे। शिवायेति चात्रे-
-पि त्रिवर्णं त्रिपदं क्रमात्। सोऽहमस्मीत्युपलक्षिता-
-हन्तादिक्षतोपबृंहित शिव भावना भवेदित्याह ।
चिद्रूपात्मनि बुद्धिशन्त्यक्त्वा वृत्तिमरीचिकाम् ॥
लब्ध्वा शिवपदद्वारा ध्यायेत्पञ्चाक्षरीं सुधीः ॥
सुधीः। दीक्षित श्रुताधीत शिवागममनन जनित-
ज्ञान विदित त्रिपदार्थ कृत पाशत्व शिवत्व विवेक वेद-
-न विवक्षित हेयोपादेय तत्त्वयोगोपाय स्वरूप-
स्वचिद्वृत्तिक समुत्थ क्रिया सामर्थ्यः। चिद्रूपा क्रमिक-
-दीक्षायोगात्, शिवागमश्रवण मनन जनित शास्त्रीय-
परीक्षाज्ञान ध्यान समाधि साक्षात्कारत्मवा तत्प्रासा-
-दमनन्तर व्यवधानादुपरि साक्षादपि पतिज्ञान व्यङ्ग्य-
-त्वेन स्वसमवेत भावव्युत्पत्तिक पतिज्ञान करणत्वे-
-न करणव्युत्पत्तिक पतिज्ञानाख्यया आत्मनश्चिद्रू-
-पया वृत्तिमरीचिकाम् क्षणविध्वंसित्वेन मृगतृष्णा-
वदुपन्यस्तां शिव सिद्धान्ते करणव्युत्पत्तिकज्ञानाभि-
-कां पातञ्जलादौ भावव्युत्पत्तिक ज्ञानात्मिकां पाशेषु
पशुपति भ्रमरूपां शुद्धकोटौ याथार्थ्यवतीं पाशज्ञानाख्यां
शुद्धाशुद्ध कलावृत्त्युपबृंहिताम् अशुद्धां शुद्धां बुद्धिवृत्तिं
पुनस्तथाविध बुद्धिवृत्ति व्यक्तोप बृंहिताम् भाव-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

165. a. व्युत्पत्तिकज्ञानात्मिकां पुनरकिंचिद्वेदन विलक्षण-
विपरीत प्रतिपत्तिभूत किंचिद्वेदनात्मिकाम् पुन-
-रभोग्यताकृत सुखादि वेदन विलक्षण विपरीत
प्रतिपत्तिभूत भोग्यताकृत सुखादि भोगात्म वेदनात्मि-
-कां वेद्यावलादिषु नित्यमुक्त शुद्ध ब्रह्मणि जीवपुरुष-
पारवश्यकृत पशुभ्रमरूपाः वा पुनरनात्मनि शिवात्म
रूपात्मनि पाशभ्रम पशुभ्रम नित्यमुक्तपति भ्रमरूपां
वा पुनरुपरि शुद्धाध्वन्यपरमति ज्ञानोपबृंहिताम्
पशुज्ञानरूपां करणव्युत्पत्तिक ज्ञानात्म चिच्छक्ति वृत्तिं
च त्यक्त्वा स्वकारण भूत समनान्तावच्छिन्न भूतात्मा-
-न्तरात्म तत्त्वात्म जीवात्म मन्त्रात्माभिस्सह तत्तद्भूता-
-त्मादि जयकारक तत्तद्भूतात्म योगादि नामसु सालंब-
शिव योगेष्वध्वत्स्वेव. निरालंबाख्ये सर्वनिरालंब प्रका-
-शितम्। निरालम्बाख्ये मनो निरालम्बो भविष्यतीति
श्रीमद्देवी कालोत्तर श्रुतेर्दुर्लभाख्य दाहज गज भावनावत्
निरालम्बमाया महामायामया महामायज प्रपञ्च-
भावनया वा विहाय स्वकारणे विलीनामिव विभा-
-व्येत्यर्थः। अहदब्रह्मलक्षणया शिवे तुर्यं स्वचिन्माति-
-रिक्ते सुषुम्नाशिखरोन्मना मूलाग्रोपाधिते चात्मनि
शिवपदद्वयाया निष्पन्नमित्यस्वभाव शिवशक्ति प्रभाम्

Center for Shaiva Studies, Pondicherry Collection

लब्ध्वा सर्वशास्त्र प्रमाण मनोमन्त्रादि व्यवहितोन्न-
-मन्ती निरस्तत्वात्तां साक्षाल्लब्ध्वा शिव सम्भाव्य
पातिकान वृत्ति मतत्त्वास्य तस्यैव दृष्टा इदं स्वात्मपरात्म-
कं शिवात्म परात्मकं परशिवं समवायात्म सादृश्या-
-त्म सन्निधिभूत सम्बन्धाश्रयां दृष्ट्वा मत्वा च साक्षात्कु-
र्वीति व्याख्येयम् । साक्षात्कार लक्षण परोक्ष ज्ञानस्य
श्रवणमनन तदुक्तिनिष्पन्न ज्ञान पूर्व साक्षात्कारवद्भि-
-नय ध्यान समाध्यनन्तर भाव्यत्वात् । पञ्चाक्षरीं
पञ्चानामक्षराणां समाहारः पञ्चाक्षरी तां त्रिवर्णा-
-त्मिकां शुद्धां पञ्चाक्षरीं ध्यायेत् । अपेक्षित्यनुक्त-
ध्यायेदित्युक्तत्वात् मुख्य नमाक्षरार्थान्त हि वर्णोप-
-लक्षित तत्त्वमसीति त्रिपद वेदान्त वाक्योपलक्षित
सिद्धान्त महावाक्य त्रिपदार्थान् तथा शिदृशैव शिवाये-
-ति त्रिवर्ण स्मृत्यन्त स्मृत्वा ध्यायेत् । गुरूपदिष्ट
जीव परैक्य मार्गेण चिन्तयेत् । वक्तुं शिवायेति
मुख नमाक्षरार्थान् क्रमेण शिवशक्त्यात्मरूप्य-
त्रिपदार्थान् तादात्म्य सादृश्य द्विसम्बन्धैक्यैकी-
कृत्य तद्ध्यानमपूर्वमपूर्वं वोभयं वा शिवात्म-
शिवमात्रं वा ध्यायेत् । पुनः कथं कुर्वते । द्वाद-
-शान्तस्वाधिष्ठानमूलस्थ हृदादि स्वस्थूलाग्रान्तेषु

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विकसितौकारद्युन्मान्तमन्त्रात्मतन्मूलाग्रान्तरनु-
-विद्ध भूतात्मान्तरात्मतत्त्वात्मजीवात्म चतुरात्मकं च
सत् पञ्चात्मकं हृदयं च सङ्कुचित तादृश तदात्म-
पञ्चकवद्विनद्धभावं कालानुगुणं सामर्थ्यानुगुण-
165. b. -मुपासनाद्ध्यानवतान्तथो भवन्न शिवभावना कार्या।
तथाहि। भूतात्मान्तरात्मजीवात्ममन्त्रात्मस्फुरनः
औकारादि समनाकलान्त पर्यन्तेन त्वंपदवाच्यार्थेन बिन्दु-
-कलाधारस्थूल जीवत्वनिर्मुक्ते बिन्दुकलामाधिकृत्यो-
-परि स्थूलसूक्ष्म शिवत्वोपबृंहित सूक्ष्म जीव परजीव-
-त्वात्कथञ्चित् त्वंपदवाच्यार्थत्वमस्ति यद्यपि बिन्दु-
-कलाद्युन्मना कलापर्यन्तेन तदुपलक्षित शिवपदवाच्या-
-र्थेन क्रमिकध्यान समाधि भूमिभूत समाना मुक्तो-
-न्मना कला मूलाग्रानुविद्ध त्वंपद लक्ष्यार्थत्वमाद्युन्म-
-ना कलामूल तदुपलक्षित शिवपदलक्ष्यार्थ पर-
-पर्यन्तेन ध्यान समाध्युपाधि निर्मुक्तेरस्तीति
व्यत्यस्त परातासि पदलक्ष्यार्थ शिवान्तःपातन्ना-
-येन ध्यान समाध्युपाध्यातासिपद वाच्यार्थेन च
जहदजहल्लक्षणया निर्मुक्तेषु शिवायेति त्रिवर्णो-
-पलक्षित वेदान्तमहावाक्योपलक्षित सिद्धान्त महावाक्य-
-त्रिपदलक्ष्यार्थेषु समनासमनारहित कुम्भक समान-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जीवन समनाकलात्मकामिक कृतसमुद्भूत केवल-
कुम्भक ध्यानवदुन्मनाकलामूलाग्रान्त रुद्ग्राव-
धिक समुत्थात्म सुषुप्त्यात्म तुर्यमूल प्रदर्शनीय-
निर्मुक्तेति पुनरुन्मनाकलान्तो क्रमिककृत समु-
-द्भूत पूर्वकुम्भक रन्ध्रकुम्भक स्वन्य साक्षात्कारव-
-द्भिन तुर्योपाख्यात तुर्यातीत प्रदर्शनीय मौनान्तमुक्तेति
क्रमिक त्रिमुद्राभिर्मुक्तेषु पुनरात्मविद्यातत्त्व शिव-
तत्त्व संज्ञितेष्वात्मपरशिवेषु त्रिषु पदार्थेषु क्रमिक-
२ जीवपरानुसन्धानभूत ध्यान तदनुसन्धान नैरन्त-
-र्य नैश्चल्य रूपिता चेतो दृष्टि सदृश समाधि तदनुसन्धा-
-न साक्षादाविर्भाव शरीर साक्षात्कारणां निश्शेष-
वासना तरशक्ति दौवारिक तादात्म्य भूमिभूतामनुस्म-
रन् पुनस्सर्वज्ञत्वनुतत्वात्मानं परिपूर्णं विचिन्त-
येद्विति सर्वज्ञानोत्तरश्रुतेः क्रमिक, चित्त्वमात्रताद्वि-
सर्वगन्तृतादि सर्वज्ञतादीनां तथा तेषु त्रिषु पदार्थे-
ष्वात्मपरशिवेषु तादात्म्य भूमितां चानुध्यायन्
पुनरन्योन्य समापतितया स्वात्म शिवव्याप्ति विवक्षि-
-त स्वात्मशुद्धाद्वैत ध्यान चिकीर्षया शिवात्मशिव-
जातिमात्र विवक्षित शिवात्मशिव विशिष्टाद्वैत-
ध्यान चिकीर्षया पुनरारोपित शिवात्मशिवव्याप्ति-

Center for Shaiva Studies, Pondicherry Collection

विवक्षित शिवात्म शिवात्म शिवरूपाद्वैतध्यान-
न्निकीर्षया वा स्वयमेव शिवं भाव्य स्वयमेव
शिवं भवेत् । समरसी भावयोगेन तत्समाधिरिहो-
च्यत इति स्कन्दकालोत्तर श्रुते सर्वात्मासीत्युप-
लक्षित शिवतात्त्ववासिताभिर्विपर्यस्त सोहम-
स्मीत्युपलक्षित शिवताहन्ता रसितानुबन्धेनैव
करणीयां शिवभावना मनत्स्मृत्या शिवायेति त्रि-
वर्णान्तर्निहितैव तृणकल्प प्रमाण प्राकृतमनो-
वैन्दवमनो लिङ्गस्थ द्युतिमता पुनरेतत्तृणकल्पानि
166.a त्रीण्यभिभाव्योपरिष्टादधस्तिर्यगपि प्रसृत निरालम्ब
ज्वालामालाक शिवशक्ति वायुसखाग्निकल्प चिद्धुता-
गुह्यवनुविद्ध शाक्तमननैव जपेत्स्मरेत् । जहदजह-
ल्लक्षणया गुरुलिङ्ग जङ्गम भूतायां पदवाच्यार्थ इत्यधि-
कारानुविद्ध सदाशिव भोगानुविद्धाहन्त शिवभूतक-
ल्पितोपाधि विनिर्मुक्त लक्ष्यार्था तिक्रान्त बिन्दुक पर-
शिवान्तः पातनीय शिवपदवाच्यार्थ इति पुनरसि-
पद लक्ष्यार्थ शिवान्तः पातनीय ध्यान समाध्युपा-
ध्यातानातिक्रान्त बिन्दुक परशिव भूतात्मातिक्रान्त-
बिन्दुक परशिव भूत परभूतात्म परभूतास्मि पद-
वाच्यार्थ इति त्रिभिः क्रमिक निर्मुक्तेषु क्रमिक-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE
Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-ध्यान समाधि साक्षात्कार भूमि भूतेष्वेवं षड्लक्ष्या-
-र्थानतिक्रान्त बिन्दुक, परशिव भूतात्म शिवपदल-
-क्ष्यार्थातिक्रान्तबिन्दुक परशिव भूत परास्तषड्लक्ष्या-
-र्थ शुद्धशिव भूत शिवेषु पुनस्तीति भावना यस्मात्त-
-स्मात् शैवमुदाहृतमिति श्रीनिश्वासकारिका श्रुतेर्य-
-थोपदिष्टं शिवता यस्तास्तितानुसन्धानात्मिकां प्राक्
प्रोक्त शिवभावनायामपि पुनस्तीति परिस्फुरितां
स्वस्थायामपि पुनरस्तीति परिस्फुरित प्राक्प्रोक्तशिव-
-भावनां पुनरशेषितां शिवात्म शिवभावनामन्त-
-स्मृत्वा शिवायेति त्रिवर्णात्मकां मनसैव जपेत्।
स्मरेत्। तदित्थं पुनरशुद्धतत्त्वाशुद्ध भुवनाध्वव्या-
-पक शुद्धनिवृत्यादिकलारूप शुद्धमन्त्र रुद्रपद शुद्ध-
वर्णशुद्ध भुवनशुद्ध तत्त्वरूप तद्व्यापक शान्त्यादि द्विक-
-ला रूपैरुपलक्षित प्रासादकलारूप समार्ग कैलास-
-नाद्विशुद्ध कर्मावरण सिद्धान्तसम्भूत सहमार्ग
सालम्ब शिवयोगमार्गत्तस्य मुक्तिपदत्वेवं समन्त्र-
-व्यत्र समार्ग निर्मार्ग प्राणायाम भूत प्राणायामप्र-
-त्याहार भूत प्रत्याहार ध्यान भूत ध्यान समाधि भूत
समाधि साङ्ग निरङ्ग सावरण निरावरण ज्ञानावरण
सिद्धान्त सम्भूत कान्तिक सहमार्गारूप सन्मार्ग

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-निरालम्ब शिवयोगानुष्ठातारो भवामः। तदुक्तम्
योगसङ्ग्रहे: आधाराधेय संयुक्तं कल्पना भावनं विदुः।
तावत्तु सकलं प्रोक्तं निष्कलं तान्डवं शुभम् ॥
करपादोदराद्यानां कल्पनं सकलं विदुः ।
कल्पनारहितं यत्तु सन्मार्गज्ञानमुत्तमम् ॥
योगिनां योगमित्युक्तं ज्ञानिनां ज्ञानमेव च ।
कल्पनावर्जितं ज्ञानं तस्मात्तन्नैव शक्यते ॥
तेनोक्ता कल्पना पूर्वं निश्चयेनास्ति कल्पना ।
उच्चारणैर्यदा हीनं निर्विकल्पपदं भवेत् ॥
मनसा चिन्त्यते यत्तु बुद्ध्या यत्र विकल्पना ।
बुद्ध्यहङ्कारनिर्मुक्तं तद्धि निष्कलमुच्यते ॥
तारकं च मनोगम्यं भावनाख्यं मानस्यकम् ।
निरुपाधिकचिद्रूपमनादिज्ञानयोगकमिति ॥
तथापि शिवधर्मोत्तरे। अमार्गेणापि यो योगं श्रद्-
166.b. धानस्समभ्यसेत्॥ सोपि कालेन बहुना ध्रुवयोग-
मवाप्नुयादित्याशङ्क्य विषये। गच्छंस्तिष्ठन् स्वपन्
जाग्रन्नुन्मिषन्निमिषन्नपि। शुचिर्वाऽप्यशुचि-
-र्वापि शिवं सर्वत्र चिन्तयेदित्यमार्गयोगः प्रोक्तः।
पुनस्सन्मार्गयोगसिद्धिमतस्सन्मार्गयोगेत्यत्राभिनि-
-वेशिनोऽति मुमुक्षोरपि सन्मार्गयोगस्य मार्गयोग-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

मोक्षो नास्तीत्यमार्गेण। सन्मार्गयोगः कर्तव्य इत्यु-
क्तं देवि कालोत्तर सर्वज्ञानोत्तर निश्वास कारिकासु।

शास्त्राणि नाड्यः पद्मं नादबिन्दुबीजमण्डलम् ।
रूपमित्यादिकं किंचिद्दृश्यन्नैव कदाचन ॥
कुहकं मन्त्रजालं च प्राणायामादि धारणम् ।
सर्वमेतन्न कर्तव्यं मोक्षमक्षय विद्युता ॥
नात्र पूजा नमस्कारो न जपो ध्यानमेव च ।
केवलं बोधमित्युक्तं वेदितव्यन्न किंचन ॥
स्वयं पतित पुष्पैस्तु कर्तव्यं शिवपूजनम् ।
गच्छंस्तिष्ठन् स्वपन् जाग्रन् भुञ्जानश्च पिबन्नपि ॥
सर्वदा सर्वकालेषु वातशीतातपेषु च ।
भय दारिद्र्य रोगेषु मान्द्य विज्वरकादिषु ॥
आत्मन्येव स्थितश्शान्त आत्मतृप्तिस्तु निष्कळः ।
अस्मिता कलया युक्तं चेतव्यं सकळं स्मृतम् ॥
अस्मिता रहितं चेतश्चेतव्यं शान्तिरुच्यते ।
अहंकारो नाम क्षुद्रव्याज्यनमात्रा लोकमद्वयम् ॥
मुक्तिबीजं तदाख्यातम् परयोग प्रवर्तकम् ।
तद्गुणोहमिति ध्यात्वा सर्वासक्तिं विवर्जयेत् ॥
यत्तत्परम सद्भावं शिवयोगमनामयम् ।
न तस्य कालो वेला वा न स्थानन्न प्रयोजनम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कल्पना रहितं योगं सर्वस्योपरि संस्थितमिति ।
ततो मार्गयोगानुचितकाले यदाकदाचिदकालेऽपि
अनवकाशे तद्वत्तद्मार्गयोगिनोऽपि वयं भवामः । पुन-
रुक्तशाक्तविषये यथा शक्तिकृताङ्कोपकृतो मार्गामार्ग-
योगश्च प्रोक्तः । तदुक्तं मृगेन्द्रे - शक्तिव्यस्तसमस्तेषु
कृतयत्नस्य योगिनः । विभक्तिशक्तयो विश्वं व्याप्य
भावो हि विविधः ॥ इति । ततो मार्गामार्गयोगार्हकाले
मार्गामार्गयोगिनोऽपि वयं भवामः । तद्वत्त्रियोगा-
-नधिकाः त्रियोग्याभ्यासाः केचिद्गुरुमेव ज्ञानावरण-
-सिद्धान्तसम्भूत सन्मार्गयोगिनो नान्येऽपीति वार्तामात्रं
वदन्तो भ्रमन्तो स्थिता मेहेविद्वैरिति सूत्रेण पुरा
प्रोक्तां भावनां विनापि तद्विकृतिं पञ्चाक्षरीं भावनामा-
-चरतामपि समाधिपूर्वं साक्षात्कारो भवेदित्याह ।
शिवैनक्यं गतस्सिद्धस्तदधीनस्ववृत्तिकः ॥
मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान् ।
शिवैनक्यं गतः प्रोक्तप्रकारेण कृतपञ्चाक्षरगर्भ-
-कृतशिवोहं भावनः । सिद्धः । तद्ध्यानोत्कर्षणस्थानस्थैर्या-
याभिनिवेशचिह्नसमाधिमान् । ततएव तदधीनस्व-
-वृत्तिकः तदधीनपरवशस्वव्यापारः मलमायाद्यसंस्पृष्टः ।
167. a जीवन्मुक्त्यपरमुक्तिपरमुक्तिक्रमिकत्रयविवक्षया

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कथञ्चिद् सर्वथा सर्वथा मलं कर्म माया महामाया कार्य-
-प्रपञ्च बन्धविमुक्तस्सन् स्वानुभूतिमान् भवति ।
तद्वा मुक्तिप्रयानुगुणं क्रमिकं साक्षात्कारापरनामव्यक्ति-
-त्रयप्रस्तपरसंविद्रात्मा स्वसंविद्रात्मशक्तिशक्तिमद्
-शिवात्मा द्विशक्ति सहजव्याप्तपरार्थस्वार्थसर्वार्थ-
-द्विविद्वार्थ क्रियाव्यापार इति पुनस्स्वानुभूतित्वेन
स्वशब्दानुभूतिशब्द प्रमिकशब्दितपरोह स्वानुभूति
द्विरूपइति च विवक्षितमुक्तशिवान्तर साक्षात्कार सहित-
शिवात्मशिव साक्षात्कार स्वात्मशिव साक्षात्कारद्विशिव-
साक्षात्कारैक साक्षात्कारवानस्ति । तद्विवृता शिवागम-
संविद्ज्ञानपादयोगपाद प्रतिपादितसविस्तरार्थस्सं-
-क्षेपेण प्रबोधितः। पुनस्तत्र तथा संसिद्धं क्रियापादार्थं च-
-र्यापादार्थं च क्रमिकं ग्रन्थद्वयेन प्रबोधयन् । तत्र प्रथम
ग्रन्थमाह । दृशोर्दर्शयिते वात्मा तस्य दर्शयिता शिवः ।
तस्मात्तस्मिन्परां भक्तिं कुर्यादात्मोपकारके । दृशोश्च-
-क्षुषोर्दर्शयिता । पश्यामीति इहालोके प्रसिद्धिरुपकार-
क इति लौकिकश्रुतेरुपलक्षणमेतदिति । स्वाचिच्छक्तिः
सहभूतपश्यन्ती वागनुस्यूत विमाराव प्रेरित मनसा
चक्षुषी प्रेर्यतामयां व्यञ्जितस्वानिच्छुतेः विषयं बोध-
-यितैवात्मा पुरुषः । तस्यात्मनो दर्शयिता संसार-

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

-दशायां श्रीमदनन्तेश द्वारा कलां सृष्ट्वा प्राक् साक्षात्
स्वसृष्ट सन्निहित नादु सह भुवनानां कलां संयोज्य प्रेर्य-
कर्तृ रूप मश्चि०यज्य प्रोक्तमार्गतो विद्या द्वारा०व्यञ्जि-
-तकरणरूप निवृत्ति द्वारा विषयं बोधयिता पुनर्मु-
-क्तिदशायां साक्षादपि गुरुद्वाराऽपि प्राक्प्रोक्तमार्गतो
दीक्षाज्ञान योग क्रिया चर्याभिः संशोध्य क्रमेण बोधयि-
-ता शिवः। तस्मात् तस्मिन् शिवे शिवनिमित्तां भक्तिं
भजनं पूजाग्निकार्यादिकं जीवन्मुक्ति साक्षात्कारस्य
सापेक्षत्वेऽपि परापरिपूर्णता कृतस्य पुनः पुनः कृति-
र्नास्तीति श्रुतेर्निष्पन्न परापरिपूर्णता कृत परमुक्ति
साक्षात्कारस्य प्राप्तिनिमित्त शिवशक्ति निरपेक्षत्वात् सदा
निमित्त सापेक्षत्वा दस्य पूर्वोक्त रीत्या निरस्त समुत्कि-
-त्वात्त्वा तद्बाधित निष्प्रत्यर्थं कुर्यात्। तद्यथा। स
-बीज विशेष निर्वाण साधकाचार्य दीक्षावत्सु जीवन्मु-
-क्तेषु यथायोगं यथाशक्ति यथाविधिवाभ्यस्त परो-
-क्षज्ञानमात्रवान् तथाभ्यस्त तज्ञायोगमात्रवान् वा
यथा योगं यथाशक्ति यथा विधिवा कुर्यात्। तत्र कृत-
-ज्ञान योगातिशिक्षाकानवरत निरालम्बध्यानवान् जीव-
-न्मुक्तस्समाधिमान् जीवन्मुक्तो जीवन्मुक्ति साक्षात्का-
-रवान् जीवन्मुक्तस्त्व स्वयं पतित पुष्पैस्तु कर्तव्यं

Center for Shaiva Studies, Pondicherry Collection

शिवपूजनमिति दैविकालोत्तरश्रुतेर्यथा योगमात्रं
167.b. यद्दृष्ट्वा कदाचिद्यथा विधिवा कुर्यात् । निर्बीज विशेष-
दीक्षावान् जीवन्मुक्तो निर्बीज निर्वाण दीक्षावान्
जीवन्मुक्तश्च यथार्हं यथाशक्ति पूजां गुरुशुश्रूषामात्रं
वा कुर्यात् । कारयेद्वा पुनरपरमुक्तिमान् जीवन्मुक्त-
विशेषो भजन्ति विविधैर्यैर्मन्त्रतन्त्र विशारद इति
श्रुतेर्यथाविधि पुनरधिकारी परमे ज्ञानयोगं समा-
-साद्येति श्रुतेर्ज्ञानीत्यत्र दृष्टदृष्टवद्भाव इति कृत्वा ज्ञानी
समाधौ योगे स्थाने नाति प्रविष्टमना यथा योगं वा कु-
-र्यात् । अत्रायं विवेकः । शिवागमश्रवणानुमान प्रयो-
-ग पूर्वकमनन मात्र जनित त्रिपदार्थ ज्ञानवत्पूर्वं शिवत्व
पशुत्व विवेकज्ञानं च परोक्षं सामान्य दीक्षा योगाद्यं यत्
तत्प्रथमं ज्ञानम् । तदुक्तं वायव्य संहितायाम् :

ज्ञानं वस्तु परिच्छेदो वस्तु च त्रिविधं भवेत् ।
अक्षरं च क्षरं चैव क्षराक्षर परं तथेति ॥

शिवधर्मोत्तरे च : शिवस्य दर्शनं ज्ञानं योगस्तत्रैक-
-चित्तता इति । तदेतज्ज्ञानवान् ज्ञानीत्युच्यते । सहमार्ग-
सालम्बन शिवयोगाद्यं योगध्यानं यत्तद् द्वितीयं ज्ञानम् ।
तदुक्तम् । ज्ञाता ज्ञानं तथा ज्ञेयमिति । तदेतज्ज्ञानवान-
-पि ज्ञानीत्युच्यते । क्वचित्क सहमार्गारूढ्य निरालम्ब-

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवयोगाद्ध्यानं यत्त्रितीयं ज्ञानम् । तदुक्तम् ।
कल्पना रहितं यत्तु सन्मार्गज्ञान मुत्तमम् ।
योगिनां योगनिष्ठुक्तम् ज्ञानिनां ज्ञानमेवचेति ॥ तदे-
-तत् ज्ञानध्यानापि ज्ञानीत्युच्यते । सालम्ब निरालम्ब
शिवयोगाद्, समाधिद्वयं यत्तच्चतुर्थं ज्ञानम् । निःश्व-
-सिश्वे सुप्रभेदे च । समाधिमधुना वक्ष्ये सर्वद्वन्द्व वि-
-वर्जितम् । ज्ञानमेव समाधिः स्यात्तद्विरुद्धिः स्तवोच्यते ।
भुक्त्वा तु विपुलान्भोगान् प्रलये समुपस्थिते ।
ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते ॥
यत्र प्रशन्नमेकाग्रं चित्तमितोद्विधिवर्जितम् ।
तत्र ज्ञानमिति प्रोक्तमज्ञानतिमिरापहमिति ॥ ज्ञान-
योगमिति द्वन्द्वैकवद्भाव इति कृत्वा ज्ञानं समाधिः योगः
प्रोक्तध्यानम् । तदेतद्द्विसमाधिज्ञानवानापि ज्ञानीत्युच्यते ।
सालम्बनिरालम्बन साक्षात्कारभेदाद्द्विविधाद्, योगात्म-
परमुक्ति साक्षात्कार त्रितयं यत्तत्पञ्चमं ज्ञानम् ।
तदुक्तं सुप्रभेदे शिवधर्मोत्तरे च निश्वासकारिकायांच ।
मलानां नाशनार्थाय अन्यशक्तिनिपातनः ।
यावद्भक्ति निपातानन्तानद्ज्ञान वेदनम् ॥
पूर्णकर्माणि सर्वाणि समत्वे शक्तिपातने ।
सदाशिवपदस्थैव शिव भक्तिर्भवेद्यदा ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तद्दीक्षां च प्रविश्याथ पूजां चैव तु भक्तितः ।
योगाभ्यासं ततः कृत्वा ज्ञानं तत्र तदाश्रयेत् ॥
तदाज्ञानान्धकारं च ज्ञानदीपेन नाशयेत् ।
स्वभावशुद्धं तत्स्थानं स्वस्वभावं तु तत्त्वतम् ॥
168:a श्याम नीलादि सम्बन्धे स्फटिकत्वं यथाहि ।
त्वविवेकाति प्रपञ्चेन शुद्धस्फटिकमावहेत् ॥
सर्वार्थ भासकं ज्ञानं शिवयोगं तु शाश्वतम् ।
प्रकाशयति मुक्त्यर्थं मुमुक्षूणां स्वयं शिवः ॥
सर्वत्र विगता दृष्टिस्तमोषा साक्षाद्दिनाम् ।

तद्वत्साक्षात्कारज्ञानवान् विज्ञानीत्युच्यते । पुनः शि-
-वक्रियाशक्त्यात्मिका दीक्षा च जडरूपत्व क्रियाविलक्षण-
जडरूपत्व क्रिया हेतुत्वमात्र विवक्षित चिद्रूपत्व क्रिय-
-त्वात् । दीयते ज्ञानसद्भावं क्षीयते च मलत्रयम् ।
अनयेति ज्ञानमिति कारणव्युत्पत्तेश्च वर्षं ज्ञानम् ।
तदुक्तं स्वायम्भुवे - अथानादि मलच्छायारुद्ध कर्मबन्धवि-
-मुक्तये । व्यक्तये च शिवत्वस्य शिवाज्ञानं प्रवर्तत इति ।
सद्यो निर्वाण दीक्षादिषु साधकानुष्ठेय शास्त्रीय ज्ञानादि-
निरपेक्षत्वादेतज्ज्ञानवानपि ज्ञानीत्युच्यते । तद्वत्तद्दोष-
ज्ञानाद्वि विहीनोऽपि कश्चिद्दुरागम्य मात्रेण लोकवाद-
प्रवाहतो ज्ञानीत्युच्यते । तावं दिश्यते । तत्र पूजा

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नमस्कारे न अपि ध्यानमेव च । केवलं शेषमित्युक्तं
वेदितव्यमत्र किंचन । स्वयं पतित पुष्पैस्तु कर्तव्यम्
शिवपूजनमित्यादि ज्ञानात्वाहे न सर्वेषां प्रोक्तानां शान्तिना-
-शुभय भ्रष्टत्व प्रसङ्गात् । किन्तु प्राक्प्रोक्तवत् शिवदीक्षा
-पूर्वं नित्यैक्तर ज्ञान पूजाख्य नित्यलक्ष शिवध्यान शिव
-समाधि जीवन्मुक्ति शिव साक्षात्कारवतां त्रयाणामेवे-
-ति न किंचिदसमञ्जसम् ॥ अथ द्वितीय प्रश्नं चो-
-द्धा समाधत्ते । मुक्ते प्राप्य सतस्तेषां भवेद्दूषं शिवा-
लयम् ॥ एवं विद्यादिगुण ज्ञानबोधे शैवार्थनिर्णयम् ॥
वेषमित्याधारलक्षणया गुरुजङ्गमौ । शिवालयमित्याधार-
लक्षणयैव लिङ्गं च प्रदक्षिण नमस्कारादिभिस्सेव्यते ।
उपलक्षणं चैतदाचार्य साधक निर्वाण दीक्षित पुत्र समयीनां
यथार्ह क्रियमाण सर्व क्रिया च कार्याणां शिवत्व साध-
-कानामिति सर्वं समञ्जसम् । तस्माच्चर्याणां मध्ये
शिवागमाध्ययनं सर्व प्रायश्चित्तम् । तदुक्तं प्रायश्चित्त-
समुच्चये :- अहन्यहनि योधीते विधिस्थ शिवसंहिताम् ।
स हन्ति सर्वपापानि तामिस्रं भास्करो यथेति ॥

॥ ओम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection